Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म् ।

सा० संख्या ६६१/२३ 22 पंजिका संख्या 64035

पुस्तकों पर सर्वप्रकार की निशानियां लगाना अनुचित है ।

कोई विद्यार्थी पन्द्रह दिन से अधिक पुस्तक नहीं रख सकता ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

44024

पुस्तकालय

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

वर्ग संख्या.............. आगत संख्या..............

पुस्तक विवरण की तिथि नीचे अंकित है। इस तिथि सहित 30 वें दिन यह पुस्तक पुस्तकालय में वापस आ जानी चाहिए अन्यथा 50 पैसे प्रति दिन के हिसाब से विलम्ब दण्ड लगेगा।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केवलान्वयि अनुमानम्।

श्रीमद्गङ्गेशोपाध्यायविरचितम्।

श्रीरघुनाथशिरोमणिभट्टाचार्य्यविरचितटीकासहितम्।

श्रीजगदीशतर्कालङ्कारकृत विवृत्या

समलङ्कृतम्।

CHECKED 1973
Initial

पण्डितकुलपतिना,

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

सङ्कलितवादार्थसमुद्भासितम्।

तेनैव संस्कृतं प्रकाशितञ्च।

द्वितीयसंस्करणम्।

कलिकातानगरे

कलिकातायन्त्रे

मुद्रितम्।

ई १८९७।

R661,UPA-K
44035

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केवलान्वयि अनुमानम् ।

श्रीमद्गङ्गेशोपाध्यायविरचितम्

श्रीरघुनाथशिरोमणिभट्टाचार्य्यविरचितटीकासहितम् ।

श्रीजगदीशतर्कालङ्कारकृत विवृत्या

समलङ्कृतम् ।

पण्डितकुलपतिना,

बि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

सङ्कलितवादार्थसमुल्लासितम् ।

तेनैव संस्कृतं प्रकाशितञ्च ।

द्वितीयसंस्करणम् ।

कलिकातानगरे

कलिकातायन्त्रे

मुद्रितम् ।

इं १८९७ ।

661.38

44035

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर बि, ए,

PANDIT KULAPATI

JIBANANDA VIDYASAGARA, B. A.

Superintendent, Free Sanskrit College, Calcutta.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केवलान्वयि अनुमानम् ।

तच्चानुमानं त्रिविधं केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् । तत्रासद्विपक्षं केवलान्वयि तथाहि केवलान्वयिनोऽभिधेयत्वस्य न विपक्षः अभिधानेऽनभिधाने च विपक्षत्वव्याघातात् । अथ यथा आकाशशब्दाच्छब्दाश्रयत्वमनभिधेयमप्युपतिष्ठते तथाभिधेयत्वविपक्षस्यानभिधेयत्वेऽपि पदादुपस्थितिः स्यात् एवञ्चाभिधेयत्वं कुतोऽपि व्यावृत्तं धर्मत्वात् गोत्ववदिति चेन्न व्यावृत्तत्वस्याव्यावृत्तत्वे व्यावृत्तत्वमेव केवलान्वयिव्यावृत्तत्वे यत एव व्यावृत्तं व्यावृत्तत्वं तदेव केवलान्वयीति धर्मत्वस्यानैकान्तिकत्वात् एवमत्यन्ताभावप्रतियोगित्वस्यात्यन्ताभावाप्रतियोगित्वे अत्यन्ताभावप्रतियोगित्वमेव केवलान्वयि अत्यन्ताभावप्रतियोगित्वे यन्निष्ठात्यन्ताभावप्रतियोग्यत्यन्ताभावप्रतियोगित्वं तदेव केवलान्वयि न चात्यन्ताभावप्रतियोगित्वं व्यावृत्तत्वञ्च ना

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेति वाच्यम्। अनुगतप्रतीतिबलेन गोत्ववत्तयोः सिद्धेः तत्र न तावद्व्याप्यवृत्त्यत्यन्ताभावः केवलान्वयी तस्य प्रतियोग्यवच्छिन्नेऽप्यत्यन्ताभावात् अत्यन्ताभावप्रतियोगिनश्च केवलान्वयित्वात् नाप्याश्रयनाशजन्यः गुणनाशात्यन्ताभावः तस्य नाशस्य सर्वत्रात्यन्ताभावादिति वाच्यम्। यत्र हि प्रतियोगिप्रागभावो वर्त्तते तत्र न तदत्यन्ताभावो वर्त्तते तथाच नाशस्य प्रागभावो यत्र नाशप्रतियोगिसमानदेशे वर्त्तते तत्र कथं नाशात्यन्ताभावो वर्त्ततां तर्हि नाशस्य तत्र वृत्तिः स्यादिति चेन्न। पूर्वं तत्र नाशप्रागभावस्यैव सत्त्वादुत्तरकाले आश्रयस्यैवाभावात्। नाप्याकाशात्यन्ताभावः केवलान्वयी तस्यापि प्रतियोगिरूपात्यन्ताभावप्रतियोगित्वात् अभावात्यन्ताभावस्य भावत्वात्। अथाभावात्यन्ताभावो न प्रतियोगिरूपस्तथा सति अन्योन्याभावात्यन्ताभावः प्रतियोगिरूप इति प्रतियोगिसमानदेशोऽन्योऽन्याभावो न स्यादिति चेन्न। अत्यन्ताभावात्यन्ताभावः प्रतियोग्येव अन्योन्याभावात्यन्ताभावस्तु प्रतियोगिवृत्तिरसाधारणो धर्म इति। उच्यते वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं आकाशा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्यन्ताभावो यद्यपि प्रतियोगिरूपात्यन्ताभाव-
प्रतियोगी तथापि स न वृत्तिमानित्याकाशा-
त्यन्ताभाव एव केवलान्वयी तथा प्रमेयत्वा-
भिधेयत्वादि केवलान्वयि वृत्तिमतोऽत्यन्ता-
भावस्याप्रतियोगित्वात्। न च प्रमेयत्वं प्रमा-
विषयत्वं तच्च न केवलान्वयि प्रमाया विषय-
त्वस्य चाननुगमादिति वाच्यं प्रमात्वमेव
हि परम्परासम्बन्धात् घटादौ प्रमेयत्व-
मनुगतं प्रमाजातीयविषयत्वं वा तथापि केव-
लान्वयिनि संशयाभावात् कथमनुमितिः प्रमेय-
त्वमत्र वर्त्तते न वेति संशयश्च न प्रमेयपक्षकः
किन्तु प्रमेयत्वपक्षको भिन्नविषयकः। प्रमेयत्व-
पक्षके चास्तित्वसाध्यस्यान्वयव्यतिरेकित्वं तथा
च घटः प्रमेयो न वेति संशयो मृग्यते स च
नास्त्येव। अथ पक्षः साध्यवान्न वा पक्षे साध्य-
मस्ति न वेति संशयौ समानविषयकावेव तद-
स्यास्त्यस्मिन्निति मतुपो विधानादिति चेन्न। विशे-
षणविशेष्यभावभेदेनार्थभेदात्। मैवम्। य एव
हि संशयः पक्षे साध्यसिद्धिविरोधी स एवानुमा-
नाङ्गमावश्यकत्वात् लाघवाच्च न तु समान-
विषयकत्वमपि तत्र तन्त्रं गौरवात्। प्रमेयत्वं घट-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्ठात्यन्ताभावप्रतियोगि न वेति संशयश्च घटः प्रमेय इति साध्यसिद्धिविरोधी भवत्येव । यद्वा संशययोग्यतैवानुमानाङ्गं संशयस्य तदानीं विनाशात् । न च सापि साधकबाधकप्रमाणाभावः प्रमेयत्वाभावासिद्धौ तत्प्रमाणासिद्धेस्तदभावासिद्धिरिति वाच्यम् । पक्षनिष्ठात्यन्ताभावाप्रतियोगित्वज्ञानस्यैव साध्यसाधकत्वेन तदभावस्यैव योग्यतात्वात् प्रमेयत्वमत्यन्ताभावप्रतियोगीति भ्राम्यतः संशय इत्यन्ये । नन्वेकरूपविकलमिदं कथं गमकं तत्त्वे वा व्यतिरेकविकलवत् रूपान्तरविकलमपि गमकं स्यादिति चेन्न । अन्वयव्यतिरेकव्याप्त्योरन्यतरनिश्चयेनानुमित्यनुभवात् युगपदुभयव्याप्त्युपस्थितौ विनिगमकाभावेन उभयोरपि प्रयोजकत्वे व्यतिरेकोपासना । व्यतिरेकश्च विपक्षवृत्तित्वशङ्कानिवृत्तिद्वारा व्यतिरेकव्याप्तावुपयुज्यते अत्र तु विपक्षाभावेन शङ्कैव नोदेति ।

इति श्रीमद्गङ्गेशोपाध्यायविरचितम् केवलान्वयि अनुमानम् समाप्तम् ।

———

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ शिरोमणिकृता केवलान्वय्यनुमानटीका।

केवलान्वयीत्यादि केवलान्वयिसाध्यकादीत्यर्थः। तत्र तेषु मध्ये असिद्धिपक्षम् अत्यन्ताभावाप्रतियोगिसाध्यकं केवलान्वयि एवमगृहीतान्वयव्यतिरेकिसाध्यकं केवलव्यतिरेकिगृहीतान्वयव्यतिरेकिसाध्यकमन्वयव्यतिरेकिव्याप्तिग्राहकसहचाराभेदाद्भेदे त्वन्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वं तच्च प्रकृतव्याप्तिग्राहकाज्ञानविषयसहचारत्वव्यापकान्वयसहचारत्वकत्वं तादृशसहचारत्वव्यापकप्रकृतव्याप्तिघटकसहचारत्वकत्वं वा गृहीतव्याप्तिभेदाद्भेदे तु प्रकृतहेतुकप्रकृतसाध्यानुमितिहेतुज्ञानविषयव्याप्तित्वव्यापकप्रकृतसाध्यव्याप्तित्वकत्वं तत्त्वम् जलं निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वादित्यादौ हेतुतावच्छेदिका च व्याप्तिर्न प्रकृतसाध्यानुमित्यौपयिकी तद्विशिष्टपक्षधर्मताज्ञानेऽपि व्याप्त्यन्तरबोधं विना निर्गन्धत्वानुमित्यनुदयादिति नाव्याप्तिः। वह्न्यभाववान् वह्निव्यापकाभावप्रतियोगिमत्त्वादित्यादावन्वयव्याप्तेरवच्छेदिका व्यतिरेकव्याप्तिर्न तु सैवेति नाप्रसङ्गः। अतएवेतरव्यापकाभावप्रतियोगित्वेनाभावप्रतियोगित्वेन वा यल्लिङ्गज्ञानं न प्रकृतसाध्यानुमितिहेतुस्तत्केवलान्वयीत्यपि वदन्ति एवं केवलव्यतिरेकित्वादिकमपि निर्वाच्यम्। अभिधेयत्वं शब्दशक्यत्वं विपक्षत्वव्याघातो विपक्षत्वासिद्धिः ननु व्यावृत्तत्वमन्योन्याभावप्रतियोगितावच्छेदकत्वं तच्च लघुगुरुसाधारणं गगनादिनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वमिति न व्यभिचार इत्यत आह। एवमिति। नन्वभावप्रतियोगित्वादिकमभावादिव्यक्तिभेदान्नानैव अनुगतव्यवहारस्तु कथञ्चिद्विशेषणतावच्छेदकधर्मानुगमादेवञ्च लघ्वा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसिद्धा लक्षणासम्भव इत्याशङ्कते तत्रेत्यादि। यत्र हीत्या-द्यभ्युपगमवादः वस्तुतो भूतलादिदेशे समये च तस्य वर्त्तमान-त्वादाकाशाभावतुल्यत्वाच्च। अभावाभावस्येति सावधारणं भावत्वात् यदाहुराचार्य्याः स्वाभावविरहात्मत्वं वस्तुनः प्रति-योगितेति। प्रतियोग्येवेति प्रागभावादेरत्यन्ताभावाभावरूप-त्वनयेऽपि न क्षतिः। तन्मतेऽत्यन्ताभावस्यापि तदभावरूपतया तस्यापि प्रतियोगित्वात्। असाधारण इति प्रतियोगिता-वच्छेदक इति तु तत्त्वम्। अथान्योन्यात्यन्ताभावसाधारणः प्रतियोगितावच्छेदकसम्बन्ध एवाभावाभावः। स च क्वचित्ता-दात्म्यं क्वचिच्च संयोगादिरिति चेत् यद्वत्त्वे हि ज्ञाते यद्वत्त्वं न प्रतीयते तदभाववत्त्वञ्च व्यवह्रियते तस्यैव तदभावात्मकत्व-मुपेयते प्रतियोगितदभाववत्त्वबुद्ध्योश्च मिथस्तथात्वसानुभविकं न च तत्सम्बन्धवत्त्वञ्च तद्विषयः सम्बन्धसम्बन्धवत्त्वाद्युल्लिखत् क्वचित्सम्बन्धबुद्धिर्विशेषदर्शनतयोपयुज्यते न च स्वतो माना-भावात्। अथ सम्बन्धान्तरावच्छिन्नाभाववति सम्बन्धान्तरेण प्रतियोगिनो वृत्तेर्न तदभावविरोधित्वमिति चेत् प्रतियोगि-तावच्छेदकसम्बन्धस्याभाववति सम्बन्धान्तरेण वृत्तेर्न तथात्वम्। सम्बन्धविशेषेण च विरोधित्वं तुल्यमेव अनतिप्रसक्तये च स्वप्रतियोगितावच्छेदकसम्बन्धत्वेनाभावत्वकल्पने कालुगम-सम्भावनापीति व्यधिकरणसम्बन्धस्यापि प्रतियोगितावच्छेद-कत्वात्तद्वति अत्यन्ताभावविलयप्रसङ्गो अथवा तदभावविलोप-प्रसङ्गो वेति। लक्षणं परिष्कुरुते वृत्तिमदित्यादि। आकाशस्य तदभावाभावत्वमित्यभ्युपगममात्रं भाववति तदभावासत्त्व-प्रतीत्या हि भावस्य स्वाभावाभावत्वं कल्प्यते न चेह तथा। अभावप्रतियोगित्वं स्वरूपसम्बन्ध एवेत्युक्तमधस्तात् अभाव-प्रतियोगित्वञ्चाप्रयोजकम् एवञ्च यत्सम्बन्धावच्छिन्नप्रतियोगि-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताकाभावाप्रतियोगित्वं यस्य तस्य तेन सम्बन्धेन केवलान्वयित्वमिति सूचयितुं वृत्तिमदिति। अतएव ज्ञानस्य ज्ञानत्वस्य च समवायेन ज्ञानविषयत्वादेश्च अधिकरणसमवायादिना सम्बन्धेनाभावप्रतियोगित्वेऽपि विषयतया परम्परासम्बन्धेन स्वरूपसम्बन्धेन च केवलान्वयित्वं संयोगाद्यभावोपसंग्रहाय च प्रतियोग्यसमानाधिकरणत्वेनाभावो विशेष्यः आकाशाभावोऽपि च यथा प्रतियोग्यसमानाधिकरणस्तथोक्तमधस्तात् वृत्तिमतस्तादृशाभावाप्रतियोगित्वमिति वार्थः। व्याप्यवृत्तित्वार्थकं वृत्तिमत्पदमभावविशेषणमित्यपि कश्चित्। तादात्म्यनाभिधेयस्य केवलान्वयित्वसम्पत्तये व्याप्तिवदखिलमालोकनीयम्। प्रमाजातीयेति तथाच तादृशाभावप्रतियोगितानवच्छेदकधर्मवत्त्वमर्थः। इत्थञ्च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यमेवाभावविशेषणम्। तेन द्रव्यगुणभेदयोर्द्वित्वादिना न केवलान्वयित्वम्। नचैवं विरुद्धयोर्धर्मयोर्द्वित्वे न केवलान्वयित्वापत्तिः तदवच्छिन्नाधिकरणाप्रसिद्ध्या तदवच्छिन्नाभावे प्रतियोग्यसामानाधिकरण्यस्यासम्भवादिति वाच्यम्। तादृशधर्मावच्छिन्नस्य यत्किञ्चिदधिकरणवृत्तितया विवक्षितत्वात् क्वचिदपि तादृशोभयवत्त्वाप्रतीतेस्तस्यातथात्वात्। सन्दिग्धसाध्यवत्त्वं पक्षत्वमित्याशयेनाशङ्कते तथापीति। अस्तित्वसाध्यस्य घटवृत्तित्वसाध्यस्य साध्यसिद्धिविरोधी साध्यसिद्धिनिवर्त्त्यः विशेषणविशेष्यभावभेदेऽपि विरोधिविषयतामात्रेण प्रतिबन्धकत्वमनुभववलादाश्रीयते। नहीदं साध्यवदन्न वा साध्यमित्यन्यतरनिश्चयेऽत्र साध्यं न वा इदं साध्यवन्न वेति अन्यतरः सन्देह इति। पक्षनिष्ठेत्यादि पक्षनिष्ठाभावप्रतियोगित्वज्ञानविरोधिज्ञानस्य साध्यसाधकत्वेन कथञ्चित्साध्यसिद्ध्यनुगुणत्वेन पक्षनिष्ठाभावप्रतियोगित्वज्ञाना-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावस्य वा साध्यस्य साधकत्वेन तदभावस्य तस्य साध्ये पक्षनिष्ठाभावप्रतियोगित्वज्ञानस्य साध्ये पक्षनिष्ठाभावप्रतियोगित्वावगाहिज्ञानत्वेन साध्यविशिष्टपक्षज्ञानविरोधित्वेन वा रूपेणाभावस्य योग्यतात्वात्। व्यतिरेकः विपक्षे हेतोरभावः व्यतिरेकव्याप्तौ साध्याभावहेत्वभावयोर्यौ व्यतिरेकौ साध्यहेतू तयो र्व्याप्तौ। अत्र वदन्ति साध्याभाववदवृत्तित्वमेव व्याप्तिर्लाघवात् प्रायशः साधनभेदेऽप्यभेदाच्च यत्सम्बन्धावच्छिन्नसाध्याभाववति हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन साध्यसिद्धिः फलम्। साध्याभाववति येन सम्बन्धेन हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन पक्षधर्मताधीकारणमिति नातिप्रसङ्गः आकाशादेस्तथात्वेऽपि पक्षधर्मताज्ञानविरहान्नानुमितिः निविशतां वा। तत्र साध्यसामानाधिकरण्यं वृत्तिमत्त्वं वा अथ साध्याभाववदवृत्तित्वं तद्वृत्तिभिन्नत्वादिरूपं व्यभिचारज्ञानविरोधिज्ञानविषयत्वेनानुगमनीयं तच्च व्यापकसामानाधिकरण्यसाधारणमिति चेत् स्यादेवं यदि व्यापकताज्ञानं व्यभिचारबुद्धिं विरुन्ध्यात्। नचैवं वह्न्यभाववदवृत्तिर्धूम इति ज्ञाने हि वह्नित्वं स्वरूपेण प्रतियोगित्वं तदवच्छेदकत्वञ्च सम्बन्धमर्य्यादया भासते धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकं वह्नित्वमित्यत्र च वह्नित्वत्वेन वह्नित्वे प्रतियोगितात्वविशिष्टतदवच्छेदकत्वत्वविशिष्टाभाव इति विषयविरोधविरहात् विशिष्टस्य वह्नित्वस्यावच्छेदकत्वेन प्रकारान्तरानुसरणे च सुतरां मणिमन्त्रादिन्यायेन च प्रतिबन्धकतायां मानाभावात् व्यापकताज्ञानादेवानुमितिरिति च नानुभविकं न वा यौक्तिकं। ज्ञानत्वत्वादिना ज्ञानत्वादेर्व्यापकतावच्छेदकत्वग्रहे ज्ञानादिमानित्यनुमितेरयोगात् अन्यथा जातित्वेनानुभवत्वव्यापकगुणत्वव्याप्यजातित्वादिना वा तथा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वग्रहेऽपि तत्प्रसङ्गात् एतेन केवलान्वयिसाध्यकत्वज्ञानमेवानुमितिहेतुरित्यपि परास्तम्। सर्वजनानुभवसिद्धानुमितिभावे धूमादिदर्शनानन्तरं जायमाने गृह्यमाणव्यतिरेकवह्न्यादिज्ञानेऽसम्भवाच्च प्रमेयत्वादेश्च घटादिवृत्तित्वं केवलान्वयित्वेन कथञ्चित्तद्वृत्तिधर्मव्यापकत्वेन वानुमेयं न तु ज्ञेयत्वादिहेतुका तदनुमितिरानुभविकी। एवं साध्याभावव्यापकाभावप्रतियोगित्वमपि नानुमित्यौपयिकं गौरवात् व्यभिचारज्ञानाविरोधित्वाच्च। वह्न्यभावसमानाधिकरणाभावाप्रतियोगी धूमाभाव इति ज्ञानं धूमाभावाभावत्वेन तत्र वह्न्यभावसामानाधिकरण्यबुद्धिं कदाचिद्विरुन्ध्यात् न तु धूमत्वेन भिन्नप्रकारकत्वात् व्यतिरेकव्याप्तिग्रहाधीना च धी र्नानुमितिस्तत्त्वेनाननुभवात् क्लृप्तकारणाभावात् सामग्रीभेदकल्पनायाश्चानुभवैकाधीनत्वात् किन्तु विजातीया तत्करणमपि प्रमाणान्तरमर्थापत्तिरेव क्लृप्तप्रमाणद्वयसमाहारसमशीलञ्च युगपदन्वयव्यतिरेकिधर्मद्वयप्रतिसन्धानम्। अथ निर्णीते विना सिद्धीच्छामर्थापत्तेरनुत्पादात् पक्षताजन्यत्वात् साप्यनुमितिर्लाघवेन पक्षताजन्यत्वस्यैवानुमितित्वे प्रयोजकत्वात्। नचैवं पक्षताप्रत्यक्षस्यापि तथात्वापत्तिरिच्छासत्वेऽपि कालान्तरे प्रदेशान्तरे वा तद्विरहसत्त्वेनैककालीनत्वाद्यतीन्द्रियघटितप्रतियोगित्वेन तस्या अतीन्द्रियत्वादिति चेन्न। अनुमिताविव पक्षताया हेतुत्वस्य निरस्तत्वात् साध्यादिभेदेनाननुगतत्वात् तज्जन्यत्वस्याप्रयोजकत्वाच्च। प्रयोजकत्वञ्च न जनकत्वमसम्भवात् न व्याप्यत्वं मानाभावादित्यादेरसकृदावेदितत्वाच्च एतेन व्याप्तिज्ञानादिजन्यत्वमनुमितित्वे प्रयोजकमित्यपि परास्तम्। साध्याभावव्यापकाभावप्रतियोगिधर्मत्वेन साध्यव्याप्यत्वानुमानाद् प्रसिद्धसाध्यकैवानुमितिरित्यपि केचित्। अथ वह्न्याद्यभाव-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वति धूमादेः समवायेन तन्तुत्वाद्यभाववति च पटादेः संयोगेन समवायादिना वर्त्तमानत्वस्य विशिष्यैवाभावो वाच्यः। तथा च जलं जातिमत् गुणवत्त्वात् गुणवच्च घटादेरित्यादिकं विलोयेत जातिगुणाभाववतोः समवेतत्वसंयोगित्वयोरप्रसिद्धेरिति चेदुपदर्शयैनमपि केवलान्वयिनः सरणिं स्वीकुरु वा स्वाधिकरणावृत्तिसाध्याभावादिकत्वमेव व्याप्तिं स्वत्वाननुगमस्य प्रागेव स्वहस्तितत्वादिति। एतेन नीलेतररूपवान् नीलासमवेतत्वे सति गोत्वादित्यादिकं विलोयेत। विशेषस्य व्यभिचारित्वात् विशिष्टस्य चानतिरिक्तत्वादिति परास्तं साध्याभावस्य विशिष्टहेत्वधिकरणावृत्तित्वात् परम्परासम्बन्धेन विशेषणविशेष्यसम्बन्धस्यैव वा तत्र हेतुत्वादिति।

इति श्रीरघुनाथशिरोमणिभट्टाचार्यविरचिता केवलान्वय्यनुमानटीका समाप्ता।

अथ जागदीशीटीका।

केवलान्वयिहेतोस्तद्धर्मिकव्याप्तिज्ञानस्य वारितजले वाच्यं घटत्वात् इत्यादौ घटत्वादिहेतोस्तज्ज्ञानस्य वा असंग्रहापत्तिः अत आह केवलान्वयिसाध्यकेति। यद्यपि केवलान्वय्यादिभेदादित्यत्र केवलान्वयितया अपरिभाषितत्वरूपं केवलान्वयित्वं वाच्यत्वादिसाध्यकघटत्वादेरपि अक्षतमेव अतः केवलान्वयिसाध्यकादीति व्याख्यानमफलं तथापि हेतुनिष्ठस्यैव केवलान्वयित्वपदार्थस्य प्रक्रान्तत्वे पश्चादुच्यत इत्यादिना साध्यनिष्ठस्य केवलान्वयित्वस्याभिधानं मूलकृतः सन्दर्भविरुद्धं स्यात् अतः साध्यनिष्ठस्यैव केवलान्वयित्वस्य उपक्रमार्थम् इत्थं व्याख्यातमितिध्येयम्।

तत्र केवलान्वयिनि इति योजनायां सप्तम्यर्थाधेयत्वस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बाधितत्वात् सप्तम्या निर्द्धारणार्थकत्वं व्यनक्ति तेष्विति। असद्विपक्षमिति मूलं विपक्षस्य सिद्ध्यसिद्धिभ्यां व्याहतम् अत आह असदिति अत्यन्तेति। अत्यन्ताभावाप्रतियोगिसाध्यकानुमितिकरणमित्यर्थः। तेन लिङ्गस्य तज्ज्ञानस्य मनसो वा अनुमितिकरणत्वेऽपि न क्षतिः। केवलान्वयीतिपदन्तु मूलस्थमिव योजितं न तु स्वातन्त्र्येणोक्तं मूलस्थस्य वैयर्थ्यापत्तेः। यद्यपि तत्र केवलान्वयिसाध्यके असद्विपक्षम् अत्यन्ताभावाप्रतियोगिकेवलान्वयीति व्याख्यानं सम्भवति निर्द्धारण द्वयान्तर्गतत्वेऽपि सप्तमीप्रयोगात् तथापि द्वन्द्वस्थानामेकं परित्यज्य अपरस्य परामर्शकत्वं तदादिशब्दस्य अव्युत्पन्नमित्याशयेन एतत् परित्यक्तमिति ध्येयम्।

न्यूनतां परिहरति एवमिति। प्रकृतहेतुधर्मिकसाध्यसहचारग्रहाजन्यव्याप्तिग्रहाजन्यायाः प्रकृतहेतुकव्यतिरेकिसाध्यकानुमितेः करणत्वं प्रकृतहेतुसाध्यककेवलव्यतिरेकित्वमित्यर्थः। न च साध्यविशेषणस्य व्यतिरेकीत्यस्य वैयर्थ्यम् अन्वयसहचाराग्रहदशायाम् इदं वाच्यम् ज्ञेयत्वात् इत्यादौ अतिव्याप्तेः तदानीमपि तस्य केवलान्वयित्वात्। व्यतिरेकित्वञ्च अत्र अवच्छिन्नवृत्तिकान्यस्य व्यतिरेकस्य प्रतियोगित्वं भेदप्रतियोगितावच्छेदकत्वं वा नातः साध्यसहचाराग्रहदशायां संयोगाभावादिसाध्यकवाच्यत्वादिहेतुककेवलान्वयिनि अतिव्याप्तिः। गृहीतेति प्रकृतहेतुधर्मिकसाध्यसहचारग्रहजन्यव्याप्तिज्ञानजन्यप्रकृतहेतुकव्यतिरेकिसाध्यकानुमितिकरणत्व प्रकृतहेतुसाध्यकान्वयव्यतिरेकित्वमित्यर्थः।

तत्रापि केवलान्वयिवारणाय व्यतिरेकित्वेन साध्यं विशेषितं दशाविशेषे वह्निसाध्यकधूमादिहेतोरपि केवलान्वयित्वमङ्गीकुर्वतामाचार्य्याणां मतमाह प्रकृतव्याप्तिग्राहकेति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहचारभेदादिति ल्यब्लोपे पञ्चमी। तेन तत्तद्व्याप्तिग्रहजनकग्रहविषयसहचारभेदमन्तर्भाव्य भेदे विभजने इत्यर्थः। उभयसहचारगृहीतव्याप्तिकस्य अन्वयव्यतिरेकिणो व्युदासाय मात्रपदम्। तथाच साध्याभावगोचरस्वाभावसहचारग्रहाजन्यप्रकृतसाध्यव्याप्तिग्रहविशेष्यत्वमर्थः। तेन इन्द्रियादेरपि व्याप्तिग्राहकत्वात् नाप्रसिद्धिः न वा अन्यदीयव्यतिरेकसहचारविषयकप्रकृतसाध्यसाधनान्वयसहचारगृहीतव्याप्तिकेऽव्याप्तिः साध्याभावत्वादिकञ्च वैज्ञानिकं ग्राह्यं नतु वास्तवम् तेन इदं वाच्यं ज्ञेयत्वात् इत्यादौ साध्याभावादेव प्रसिद्धावपि दशाविशेषे नाव्याप्तिः।

ननु वह्निमान् धूमात् इत्यादौ अन्वयेन व्याप्तिग्रहस्यापि भागवतेनैव व्यतिरेकसहचारग्रहेण जननात्। ननु इदानीं फलोपहितजन्यत्वं न निवेशितं अन्यथा भागवतज्ञाननिरूपितफलोपहितजन्यत्वाप्रसिद्ध्या भागवतव्यतिरेकसहचारज्ञानजन्यत्वमादाय अव्याप्तिदानस्य अनौचित्यात्। एवञ्च प्रमेयत्वादिसाध्यकस्थलेऽपि भ्रमात्मकव्यतिरेकसहचारज्ञानजन्यप्रमादयोः सम्भव एव प्रसज्यते कथमव्याप्तिरिति चेन्न। स्वाव्यवहितपूर्ववृत्तिव्यतिरेकसहचारज्ञानजन्यत्वरूपफलोपहितजन्यत्वाभावो विवक्षणीयः। एवञ्च यत्र केवलान्वयिसाध्यके व्यतिरेकसहचारभ्रमोऽप्रसिद्धः तत्र लक्षणगमनात् नासम्भव इति कश्चित्। तन्न। तादृशस्थलस्य प्रमाणत्वेऽपि व्यतिरेकसहचारत्वस्य अव्यावर्त्तकतया प्रकृतसाध्याभावगोचरस्वाभावसहचारग्रहाजन्यत्वस्यैव निवेशितत्वेन तादृशज्ञानाप्रसिद्ध्या तत्रापि लक्षणसमन्वयासम्भवादव्याप्तिः।

तादृशसहचारग्रहत्वावच्छिन्नजनकतानिरूपितजन्यत्वाभावस्य प्रवेशे च व्यतिरेकसहचारगृहीतव्याप्तिकेऽतिव्याप्तिः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यभिचारधीविरोधिज्ञानत्वादिनैव आचार्य्यमते अन्वयव्यतिरेकसहचारज्ञानयो र्व्याप्तिधीजनकत्वात्। तत्पुरुषीयतादृशव्यतिरेकसहचारग्रहाजन्यत्वस्य प्रकृतव्याप्तिज्ञानसमानाधिकरणव्यतिरेकसहचारग्रहाजन्यत्वस्य च यत्र केवलान्वयिनि साध्याभावादिग्रहोऽप्रसिद्धः सर्वत्र भ्रमे मानाभावात् तत्राव्याप्तिरत आह तच्चेति। इहापि प्रकृतत्वं ग्रहविशेषणम्। तथाच स्वजनकज्ञानविषयसहचारत्वव्यापकान्वयसहचारत्वकप्रकृतव्याप्तिज्ञानविशेष्यत्वमित्यर्थः। तेन धूमादिनिष्ठवह्न्याद्यन्वयव्याप्तेरेव कदाचिदुभयसहचारग्रहेणापि ग्रहात् अन्वयसहचारत्वस्य व्याप्तिग्राहकसहचारत्वाव्यापकत्वेऽपि नासम्भवः। स्वपदेन विशेषतोऽन्वयसहचारमात्रग्रहकालीनव्याप्तिग्रहव्यक्तीनामेव फलतः सङ्ग्रहात् अन्वयव्यतिरेकिष्वपि तादृशसहचारत्वसमानाधिकरणमन्वयसहचारत्वं अतो व्यापकेति।

यद्यपि प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वं घटादिसहचारस्यापीति तत्र साध्यान्वयसहचारत्वाभावादव्याप्तिः। सहचारपदेन अन्वयव्यतिरेकसहचारयोरन्यतरत्वेनोपादाने च वाच्यम् ज्ञेयत्वात् इत्यादावव्याप्तिः। तत्र व्यतिरेकसहचाराप्रसिद्धेः। न च प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वस्य प्रकृतव्याप्तिज्ञानत्वावच्छिन्नकार्य्यतानिरूपितकारणतायां विषयतावच्छेदकीभूतसहचारत्वमर्थः तच्च न घटादिसहचारेऽस्तीत्यदोष इति वाच्यम्। सहचारविशिष्टबुद्धित्वावच्छिन्नं प्रत्येव सहचारज्ञानत्वेन हेतुतया व्याप्तिज्ञानत्वावच्छिन्नं प्रति तादृप्येण हेतुत्वाभावात्। अन्यथा व्यतिरेकसहचारस्यापि तादृशत्वादसम्भवापत्तेः। गगनवान् धूमात् इत्यादौ साध्यसहचारभ्रमाधीने अन्वय्यनुमाने अव्याप्तिप्रसङ्गात्। अन्वयव्यतिरेकसाधारणस्य सहचारत्वस्य दुर्वचत्वाच्च।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथापि प्रकृतहेतुधर्मिकप्रकृतसाध्यव्याप्यतावगाहियज्ज्ञानजनकीभूतज्ञाननिष्ठप्रकृतहेतुधर्मिकसाध्यसामानाधिकरण्यावगाहित्वसाध्याभावधर्मिकहेत्वभावसामानाधिकरण्यावगाहित्वयोरन्यतरस्य तादात्म्येन व्यापकं हेतुधर्मिकप्रकृतसाध्यसहचारविषयित्वं तज्ज्ञानत्वं तज्ज्ञानविषयत्वविशिष्टप्रकृतहेतुत्वं वा प्रकृतहेतुसाध्यककेवलान्वय्यनुमानत्वं विवक्षितम्। साध्याभावत्वादिकञ्च इह वैज्ञानिकं ग्राह्यम्। तेन वाच्यं ज्ञेयत्वात् इत्यादौ साध्याभावस्य अलीकत्वेऽपि दशाविशेषेण तत्राव्याप्तिः।

न च अवगाहीत्यन्तदलवैयर्थ्यं साध्यसामानाधिकरण्यविशिष्टहेतुमत्तादिग्रहे अतिव्याप्ते दुर्वारकत्वात् तादृशज्ञानजनकत्वञ्च इह फलोपहितं ग्राह्यं तेन साध्याभावधर्मिकहेत्वभावसहचरितत्वज्ञानस्य व्याप्तिज्ञानसामान्यं प्रत्येव विशेषणज्ञानविधया स्वरूपयोग्यत्वेऽपि नासम्भवः। न च यत्त्वतत्त्वयोर्विशेषत एव विश्रामादननुगमः। प्राचीनमते स्वत्वस्येव तयोरनुगमात्। प्रकृतव्याप्त्यवगाहिस्वजनकज्ञाननिष्ठतादृशान्यतरविषयितात्वव्यापकान्वयसहचारविषयितात्वकप्रकृतव्याप्तिज्ञानत्वं तत्त्वमित्यस्यापि दुर्वचत्वाच्च। यदि च अनुमित्यजनकव्याप्तिज्ञानस्य न लक्ष्यत्वं तदा प्रकृतहेतुकप्रकृतसाध्यकानुमितिफलोपहितकरणत्वेनापि तज्ज्ञानं विशेषणीयमिति संक्षेपः।

ननु यत्र पूर्वं साध्यसहचारस्य नोपस्थितिः किन्तु तद्घटकप्रत्येकवस्तूपस्थित्यैव विशेष्ये विशेषणमित्यादिरीत्या अन्वयव्याप्तिधीः, तत्र उक्तलक्षणाव्याप्तिः। अतः प्रकारान्तरमाह तादृशसहचारत्वेति प्रकृतव्याप्तिग्रहानुकूलसहचारत्वेत्यर्थः। तथाच उक्तस्थलेऽपि व्यापकताघटकमभावस्य हेतु-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहचरितत्वमवश्यं प्रागग्राह्यं इति तत्र लक्षणसमन्वयः। तत्रापि प्रकृतहेतुसाध्यकान्वयव्याप्त्यवगाहियज्ज्ञानजनकज्ञानवृत्तिविषयितात्वव्यापकं व्यतिरेकसहचारावगाहितान्यत्वं तज्ज्ञानविषयताविशिष्टप्रकृतहेतुलिङ्गत्वं केवलान्वयित्वमित्यत्र तात्पर्य्यम्। अतो न पूर्वलक्षणोक्तदोषाणामवकाश इति ध्येयम्।

अन्वयव्यतिरेकव्याप्त्योर्द्वयोरेव ज्ञानं अनुमितिहेतु नंतु व्यतिरेकसहचारान्वयसहचाराभ्यामेव अन्वयव्याप्तिमवगत्यैवानुमितिरिति चिन्तामणिकृतां मतमालम्ब्याह गृहीतेति प्रकृतेत्यादि। प्रकृतहेतुप्रकारकनिश्चयोत्तरप्रकृतसाध्यकानुमितित्वघटितधर्मावच्छिन्नस्वनिष्ठकार्य्यतानिरूपितकारणतावच्छेदकीभूतप्रकारितात्वव्यापकप्रकृतसाध्यान्वयव्याप्तिप्रकारितात्वकानुमितिकरणत्वमित्यर्थः। तेनोभयसाधारणस्य एकस्य व्याप्तित्वस्य असत्त्वेऽपि न क्षतिः। नवा द्रव्यं सत्त्वात् इत्यादौ अखण्डाव्याप्तेरप्रसिद्ध्या तादृशकेवलान्वय्यनुमानेऽव्याप्तिः। व्याप्तिघटकानां परस्परोपश्लेषेण प्रकारितायास्तत्र अनपायादिति ध्येयम्।

अत्र च स्वपदं अनुमितिपरं तज्जनकत्वमिह स्वरूपयोग्यतामात्रं न तु फलोपहितं ग्राह्यं वैयर्थ्यात् स्वपदेन अन्वयव्याप्तिज्ञानस्थलीयानुमितिव्यक्तीनामेव धृतत्वेन व्यतिरेकपरामर्शमादाय असम्भवायोगादिति ध्येयम्। व्यापकत्वोपादानादन्वयव्यतिरेकिव्युदासः। अत्र वह्नौ साध्ये तद्धूमत्वेन धूमहेतुकव्यतिरेकिण एव धूमत्वेन धूमहेतुककेवलान्वयित्वात् तत्राव्याप्तिः। वह्निसाध्यकधूमव्यक्तिहेतुकानुमित्यौपयिकव्यतिरेकव्याप्तेः वह्निसाध्यकान्वयव्याप्तित्वाभावात्। अतो हेतौ प्रकृतपदम्। तथा च तद्धूमत्वावच्छिन्नव्यतिरेक-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याप्ते धूमत्वावच्छिन्नप्रकारकनिश्चयोत्तरानुमितित्वघटितधर्मावच्छिन्नं प्रति अनुकूलत्वविरहात् नाव्याप्तिः । साध्यांशे प्रकृतपदव्यावृत्तिस्तु ग्रन्थकृतैव वक्ष्यमाणत्वात् ।

न च यत्र हेतुतावच्छेदकवह्निर्भावेन वह्निमदन्यावृत्तिमान् पर्वत इति व्याप्तिज्ञानादेवानुमितिः तादृशान्वयिनि अव्याप्तिरिति वाच्यम् । स्वव्यापकसाध्यसामानाधिकरण्यरूपान्वयव्याप्तिज्ञानस्यैव अन्वय्यनुमितिहेतुत्वमिति प्राचां मतेनैव लक्षणकरणात् । ननु प्रकृतहेतुप्रकारकनिश्चयोत्तरानुमितित्वघटितधर्मावच्छिन्नकार्यता एव प्रवेश्यताम् । प्रकृतसाध्यकेति निवेशो व्यर्थ इत्यत आह जलं निर्गन्धम् इत्यादि न प्रकृतेति । न निर्गन्धत्वानुमितित्वावच्छिन्नस्य प्रकारविधया कारणतावच्छेदिकेत्यर्थः । विषयपदेन तादृशौपयिकत्वस्य विवक्षितत्वादितिभावः ।

तदौपयिकत्वाभावमेव विवृणोति तद्विशिष्टेति । पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वनिश्चयोत्तरानुमितित्वघटितपृथिवीत्वाभावानुमितित्वावच्छिन्नस्य जनकतावच्छेदिकायाः पृथिवीत्वव्यापकीभूताभावप्रतियोगित्वरूपायाः पृथिवीत्वाभावीयव्यतिरेकव्याप्ते र्निर्गन्धत्वरूपप्रकृतसाध्यान्वयव्याप्तित्वाभावात् तत्राव्याप्ते र्वारणार्थमेव प्रकृतसाध्यकत्वस्य प्रवेश इति भावः । इदमुपलक्षणं साध्यस्य प्रकृतत्वानुक्तौ वह्नित्वेन वह्नेः साध्यतायां व्यतिरेकात्मके द्रव्यत्वेन वह्नेः साध्यतायां अन्वयिनि धूमलिङ्गकानुमानेऽपि अव्याप्तिः स्यात् । प्रकृतहेतुभूतधूमप्रकारकनिश्चयोत्तरवह्निसाध्यकानुमितित्वावच्छिन्नं प्रति अनुकूलाया धूमनिष्ठवह्नीयव्यतिरेकव्याप्तेः द्रव्यत्वावच्छिन्नसाध्यकान्वयव्याप्तित्वाभावादिति द्रष्टव्यम् ।

ननु एवमपि वह्न्यभाववान् वह्निव्यापकीभूताभावप्रति-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगित्वात् इत्यन्वयिन्यव्याप्तिः। तत्र हेतुतावच्छेदकी-भूताया वह्न्यभावीयव्यतिरेकव्याप्तेरपि वह्निव्यापकाभावप्रति-योगिरूपप्रकृतहेतुप्रकारकनिश्चयोत्तरवह्न्यभावरूपसाध्यानुमि-तित्वावच्छिन्नं प्रति अनुकूलत्वात् तस्यामिव वह्न्यभावीयान्वय-व्याप्तित्वाभावात् इत्याशङ्क्य तत्रान्वयव्याप्तेः प्रकृतसाध्यकप्रकृत-हेतुकानुमित्यौपयिकत्वविरहात् लक्ष्यत्वमेव नास्ति, कार्व्याप्ति-प्रसङ्ग इत्याशयेन समाधत्ते वह्न्यभाववानित्यादि।

अन्वयव्याप्तेरवच्छेदिका अन्वयव्याप्तिघटिका व्यतिरेक-व्याप्तिरित्यत्र प्रकृतसाध्यानुमित्यौपयिकी इत्यनुषज्यते। ननु सैव न तु पुनरन्वयव्याप्तिरेव प्रकृतसाध्यकानुमित्यौपयिकी-त्यर्थः। अयं भावः वह्निव्यापकीभूताभावप्रतियोगिसत्ता-निश्चयोत्तरवह्न्यभावसाध्यकानुमितित्वावच्छिन्नं प्रति वह्नि-व्यापकाभावप्रतियोगिसत्तानिश्चयत्वेनैव हेतुत्वं लाघवात्। न तु स्वव्यापकवह्न्यभावसमानाधिकरणतादृशप्रतियोगिसत्ता-निश्चयत्वेन गौरवादिति तादृशहेतुसाध्यकानुमानस्य केवल-व्यतिरेकितया न लक्ष्यत्वम्। यत्रानुमितौ अन्वयव्याप्तिप्रका-रकनिश्चयत्वेन हेतुत्वं तत्करणस्यैव केवलान्वयित्वात् नाप्र-सङ्ग इत्यस्य दूषणमितिशेषः। लक्ष्ये अप्रसङ्गो दूषणं भवेत् नचैतल्लक्ष्यमितिभावः। गृहीतव्याप्तिभेदेन अनुमानभेदे प्राचां संवादमाह अत एवेति। लिङ्गतावच्छेदकस्य लिङ्गस्य यज्ज्ञाने इतरव्यापकाभावप्रतियोगित्वप्रकारकत्वानवच्छिन्नं प्रकृतहेतुसाध्यकानुमितिजनकत्वम्। यज्ज्ञानीयेतरव्यापका-भावप्रतियोगित्वानवच्छिन्नलिङ्गतावच्छेदकावच्छिन्नविशेष्यता तादृशानुमितिजनकतावच्छेदिकेति यावत् तत् केवला-न्वयीत्यर्थः।

तेन जलं निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिसत्त्वात्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादौ अन्वयिनि नाव्याप्तिः । ननु इतरव्यापकाभाव इत्यत्र इतरत्वावच्छिन्नव्यापकत्वप्रवेशेऽप्रसिद्धिः । गगनाभावादौ कथञ्चित् तत्प्रसिद्धावपि केवलव्यतिरेकिणि अतिव्याप्तिः । तत्र वह्न्यभावव्यापकाभावप्रतियोगित्वप्रकारेणैव धूमज्ञानस्य अनुमितिहेतुतया इतरत्वावच्छिन्नव्यापकाभावप्रतियोगिमत्ताज्ञानत्वे नैव अहेतुत्वात् इत्यतो लाघवाच्च आह अभावप्रतियोगित्वेनेति । अत्रापि लिङ्गतावच्छेदकविशिष्टस्य यज्ज्ञानं प्रकृतानुमितौ अभावप्रतियोगित्वप्रकारकत्वानवच्छिन्नं हेतुरित्यर्थः। नातः प्रागुक्तदोषः ।

एवमिति । सहचारभेदात् भेदव्यतिरेकसहचारमात्रगृहीतान्वयव्याप्तिकत्वं केवलव्यतिरेकित्वं यत्रान्वयव्याप्तिघटकप्रत्येकवस्तूनामुपस्थितौ सत्यां विशेष्ये विशेषणमिति न्यायेनैव अन्वयव्याप्तिधीः नतु साध्यसामानाधिकरण्यत्वप्रकारकज्ञानमपि प्रागपेक्षितम् तत्रैव अन्वयसहचारज्ञानाजन्यस्य व्यतिरेकसहचारधीजन्यान्वयव्याप्तिग्रहस्य सम्भवात्। एवमुभयसहचारगृहीतान्वयव्याप्तिकत्वम् अन्वयव्यतिरेकित्वं बोध्यम् ।

गृहीतव्याप्तिभेदात् भेदे तु प्रकृतहेतुकप्रकृतसाध्यकानुमित्यौपयिकव्याप्तित्वव्यापकव्यतिरेकव्याप्तिकत्वं प्रकृतहेतुकसाध्यकान्वयपरामर्शाजन्यप्रकृतहेतुकप्रकृतसाध्यकव्यतिरेकपरामर्शजन्यप्रकृतसाध्यकानुमितिकरणत्वं वा । यत्र स्थलविशेषे साध्यसाधनयोरन्वयपरामर्शो न प्रसिद्धः तत्र तदजन्यत्वं नोपादेयम् । अन्वयव्यतिरेकित्वन्तु प्रकृतहेतुकप्रकृतसाध्यकान्वयव्यतिरेकोभयपरामर्शजन्यप्रकृतहेतुकप्रकृतसाध्यकानुमितिकरणत्वम् ।

न च यत्र वह्निव्याप्यधूमवान् वह्न्यभावव्यापकीभूताभावप्रतियोगिमांश्च पर्वत इति ज्ञानात् वह्न्यनुमितिः तत्रान्वय-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यतिरेकेण धूमेऽव्याप्तिः। धूमत्वविशिष्टे व्यतिरेकव्याप्ते-रपरामृष्टत्वेन तत्रानुमितेः प्रकृतहेतुकव्यतिरेकपरामर्शाजन्यत्वात् व्यतिरेकपरामर्शादिशि हेतोः प्रकृतत्वाप्रवेशे च वह्नि-साध्यकाभ्यां धूमस्यान्वयेन आलोकस्य च व्यतिरेकेण परा-मर्शाभ्यां यत्र वह्न्यनुमितिः तत्रापि धूमस्यान्वयव्यतिरेकित्वा-पत्तिरिति वाच्यम्। वह्न्यभावव्यापकाभावप्रतियोगितामात्रस्य अतिप्रसक्तत्वात् तादृशप्रतियोगितावच्छेदकीभूतधूमत्वादेरेव व्यतिरेकव्याप्तितया तदवच्छिन्नस्य परामर्शे प्रकृतहेतोरवश्यं प्रविष्टत्वात् पक्षधर्मांशे प्रकृतहेतुतावच्छेदकातिरिक्तानवच्छि-न्नविशेष्यताकव्यतिरेकव्याप्तिप्रकारिताशालिज्ञानस्यैव वा व्यति-रेकपरामर्शपदेन विवक्षितत्वात्। तादृशो हि प्रकारिता व्यतिरेकव्याप्त्यंशे विशेष्यतावच्छेदकस्य विरहे हेतुताव-च्छेदकस्यैव वा तत्त्वे निर्वहतीति अतः सामञ्जस्यादिति ध्येयम्।

अथाभिधेयत्वं यदि शब्दोपस्थाप्यत्वं तदा शब्दाश्रयत्वमन-भिधेयमपीति अग्रिमसूलासङ्गतिः अतो व्याचष्टे शब्दशक्यत्व-मिति। अथ अभिधेयत्वाभाववत्त्वरूपस्य तद्विपक्षत्वस्य व्याघातो विरहः स च प्रतियोग्यप्रसिद्धत्वात् दुर्घट इत्यत आह विपक्षत्वस्येति। ननु वृत्तिमत्त्वविशिष्टस्य अत्य-न्ताभावप्रतियोगित्वस्य व्यापकं यद्व्यावृत्तत्वं तदभावेनैव वृत्तिमतोऽभिधेयत्वस्य अत्यन्ताभावाप्रतियोगित्वरूपकेवला-न्वयित्वं साधनीयमत एवाह मूले एवञ्चेति। तथाच अत्यन्ता-भावप्रतियोगित्वव्यापकस्य व्यावृत्तत्वस्य अभावोऽभिधेयत्वे स्वरूपासिद्ध एवेति भावः। यथाश्रुते अत्यन्ताभावाप्रतियो-गित्वरूपकेवलान्वयित्वाखण्डकत्वेन व्यावृत्तत्वानुमाने अर्था-न्तरत्वापत्तेः। गोत्ववदित्यत्र च गोत्वं व्यतिरेकेण दृष्टान्तः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यथा स्वरूपसम्बन्धेन व्यावृत्तत्वस्यैव तत्सम्बन्धावच्छिन्न-केवलान्वयित्वखण्डकतया तस्य गोत्वजातौ असत्त्वेन अन्वय-दृष्टान्तत्वासम्भवात्। वाक्यत्वं वा प्रकृते गोत्वं वाक्यस्यापि गोशब्दशक्यत्वादिति ध्येयम्।

ननु धर्मत्वहेतोरनैकान्तिकत्वे कथितक्रमेण अभिधेयत्वस्य व्यावृत्तत्वस्यैव वा केवलान्वयित्वसम्भवात् अत्यन्ताभावप्रति-योगित्वादेर्लक्ष्यान्तरस्यानुसरणं मूलकृतामयुक्तम् अतस्तदवतर-णिकामाह नन्विति। अन्योन्याभावप्रतियोगितावच्छेदकत्व-रूपं व्यावृत्तत्वं प्रमेयधूमत्वादौ नास्तीति। तत्रैव धर्मत्वं निरुक्तव्यावृत्तत्वव्यभिचारीत्यत आह तच्चेति। व्यावृत्तत्वं यतो व्यावृत्तं तत् केवलान्वयीति धर्मत्वं तत्रैव अनैकान्तिकम् इति यदुक्तं तदपाकुर्वन्नाह गगनादीति।

तथाच व्यावृत्तत्वं गगनादिभ्य एव व्यावृत्तं भविष्यति तेषाञ्च धर्मत्वरूपहेत्वभावादेव न तत्र अनैकान्तिकत्वशङ्कापि स्थास्यतीति भावः। न व्यभिचार इति तथाच उक्तानुमानस्य अप्रत्यूहत्वात् नाभिधेयत्वव्यावृत्तत्वयोः केवलान्वयित्वं सम्भ-वतीति कृत्वैव लक्ष्यान्तरमनुसृतमिति भावः। लक्ष्याप्रसिद्ध्या लक्षणासम्भवपरस्य न तावदित्यादिमूलस्यासङ्गतिः। अत्यन्ता-भावप्रतियोगित्वादेरेव लक्ष्यस्य व्यवस्थापितत्वात् अतस्तस्य लक्ष्यत्वं विघटयन्नाह नन्विति।

प्रतियोगित्वादिकमित्यादिना व्यावृत्तत्वस्योपग्रहः। अभा-वादीत्यादिना प्रतियोगिव्यक्तीनामुपग्रहः। तेन यावत्त्वा-वच्छिन्नाभावस्यैकत्वेऽपि तस्य प्रतियोगित्वं नैकं येन तत् केवलान्वयि स्यादिति ध्येयम्। अनुगतेति। अभावप्रति-योगीत्यादिव्यवहारो विशेषणतावच्छेदकस्य अभावत्वादेरनु-गमादित्यर्थः। अनुगतगोचरव्यवहार एव नास्ति। अभाव-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
44034

त्वादेरपि तत्तत्स्वरूपसम्बन्धरूपत्वादित्याशयेनोक्तं कथञ्चिदिति। एवञ्चेति अत्यन्ताभावप्रतियोगित्वादेर्नानात्वे चेत्यर्थः। इत्याशङ्कत इति एवञ्च मूले तत्र इत्यस्य अत्यन्ताभावप्रतियोगित्वादीनां नानात्व इत्यर्थं इति ध्येयम्।

अत्यन्ताभावस्य प्रागभावेन समं विरोधस्य नव्यैरुपेक्षितत्वादाह यत्र हीत्यादि। तत् किं तादृशनाशात्यन्ताभावः केवलान्वयीत्यतः स्वयं दूषणमाह वस्तुत इति। तस्येति तादृशगुणनाशस्येत्यर्थः। तथाच इह भूतले घटनाशाद् गुणो नष्ट इत्यादिप्रतीत्या भूतलादाविव तादृशगुणनाशात्यन्ताभावस्य असत्त्वात् कुतस्तस्य केवलान्वयित्वम्। वर्त्तमानत्वादित्यस्य नापि तादृशगुणनाशात्यन्ताभावः केवलान्वयीति मूलेनान्वयो नातः पञ्चम्यसङ्गतिः। ननु उक्तप्रतीतिरवच्छेदकत्वाख्यपरम्पराकालिकसम्बन्धाभ्यामेव देशकालयोर्नाशवत्त्वावगाहित्वेनोपपत्तौ दैशिकविशेषणतया देशकालयोस्तादृशगुणनाशवत्त्वे मानाभावः।

तथाच दैशिकसम्बन्धावच्छिन्नप्रतियोगिताकतादृशगुणनाशस्य अत्यन्ताभावः स्यास्त्येव अत आह आकाशेति। तस्येत्यनुषज्यते तथाच आकाशात्यन्ताभाव इव प्रतियोगिस्वरूपात्यन्ताभावस्यैव प्रतियोगित्वं तादृशगुणनाशात्यन्ताभावेऽपि स्यास्यतीति तस्य केवलान्वयित्वं दुर्घटमिति भावः। यत्र यदभावस्य अभावत्वं तत्र तदभावप्रतियोगित्वम् इत्येवं नियमात् नाकाशस्य स्वाभावाभावत्वसिद्धिरत आह सावधारणमिति। तथाच अभावाभावस्यैव भावत्वादित्यन्वयात् भावत्वान्यथानुपपत्त्यैव गगनस्य स्वाभावाभावत्वसिद्धिः।

ननु अभावाभावस्यैवेति यथाश्रुतं प्रमेयत्वादौ व्यभिचारी यो यदभावप्रतियोगी स तदभावाभाव इति भावत्वान्त-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्भावेण व्याप्तेरप्रयोजकत्वं भावपदवैयर्थ्यञ्च अतो व्याचष्टे प्रतियोगित्वादिति। प्रतियोगित्वेन व्यवह्रियमाणत्वादित्यर्थः। मातः साध्याविशेषः तदभावप्रतियोगित्वस्य तदभावाभावत्वव्याप्यतायां मानमाह यदाहुरिति। प्रतियोगिता प्रतियोगित्वव्यवहारप्रयोजकधर्मः। अथात्यन्ताभावात्यन्ताभावः प्रतियोग्येव इत्यसङ्गतम् प्रतियोगिभिन्नयोर्ध्वंसप्रागभावयोरपि अत्यन्ताभावाभावत्वस्य प्राचीनैः स्वीकारात् अत आह प्रागभावेति। तदभावरूपतया प्रागभावाद्यभावरूपतया तस्यापि प्रागभावादेरपि प्रतियोगित्वादिति।

तथाच प्रतियोगित्वरूपेणैव प्रागभावादेरपि उपग्रहात् नैवकारार्थबाध इति भावः। एवं सत्त्वानतिरिक्तविशिष्टसत्त्वस्यातिप्रसक्त्या द्रव्यत्वस्यैव विशिष्टसत्ताभावाभावत्वस्वीकारेऽपि नैवकारार्थबाधः। विशिष्टसत्ताभावस्यैव द्रव्यत्वाभावतया द्रव्यत्वस्यापि विशिष्टसत्ताभावप्रतियोगित्वादित्यपि द्रष्टव्यम्। असाधारणस्यापि कम्बुग्रीवादिमत्त्वप्रभृतेर्घटादिभेदात्यन्ताभावत्वविरहादाह प्रतियोगितावच्छेदकेति। यद्यपि सर्वत्र अभावस्याभावः प्रतियोग्येव तस्यापि प्रतियोगितावच्छेदकसम्बन्धेनैव अभावविरोधित्वात् घटान्योन्याभाववत्यपि संयोगादिसम्बन्धेन प्रतियोगिनो घटादेः सत्त्वे बाधकाभाव इत्यपि सुवचम् तथापि घटे घटभेदो नास्ति इत्याधाराधेयप्रतीतेः तादात्म्यसम्बन्धेन कर्त्तुमशक्यत्वात् बहूनां प्रतियोगिनां अन्योन्याभावाभावत्वकल्पनमपेक्ष्य लाघवेन एकस्य प्रतियोगितावच्छेदकस्यैव तथात्वौचित्यात् नैष प्रकारः सम्भवतीतिभावः।

मिश्रमतमाशङ्कते अथेति। सचेति प्रतियोगितावच्छेदकश्चेत्यर्थः। क्वचिद्भेदस्थले क्वचिदत्यन्ताभावस्थले न प्रतीयते

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति तस्यैव इत्यग्रिमान्वयि। ननु तद्वत्ताप्रतीतिविरोधिन एव तदभावात्मकत्वे तद्व्याप्यस्यापि तदभावाभावत्वापत्तिः अत आह तदभाववत्त्वञ्चेति। प्रतियोगितदभावयोरिति भेदप्रतियोगितावच्छेदकयोरपि उपलक्षणम्। तथात्वं विरोधित्वम्। तत्सम्बन्धवत्त्वं प्रतियोगितावच्छेदकसम्बन्धवत्त्वम्। तद्विषयः प्रतियोगिसत्ताबोधप्रकारः। तत्र सम्बन्धस्य संसर्गविधयैव भानादिति भावः।

अथ अभावव्यावृत्तत्वेन ज्ञातस्य प्रतियोगिसम्बन्धवत्त्वस्यापि अभाववत्ताबोधविरोधित्वमस्त्येव अत आह सम्बन्धसम्बन्धवदिति। तथा च तद्व्यावृत्तत्वाद्यविषयकं यद्गोचरज्ञानं अभाववत्ताबोधप्रतिबन्धकं तस्यैव अभावविरहत्वं परेणापि वाच्यम्। अन्यथा तन्मतेनापि प्रतियोगिसम्बन्धीयसम्बन्धस्य अभावविरहत्वापत्तेः। नचेदं प्रतियोगिसम्बन्धेऽस्तीति भावः। उपयुज्यत इत्यस्य अभावधीप्रतिबन्ध इत्यादिः। न स्वतः न सम्बन्धवत्ताबुद्धित्वेन तस्य प्रतियोगिनः प्रतिबन्धिमुद्रया निराचष्टे प्रतियोगितेति। न तथात्वं नाभावविरोधित्वम्।

तथाच घटाद्यभावप्रतियोगितावच्छेदकीभूतसंयोगादिसम्बन्धस्य कालिकसम्बन्धेन स्पन्दादौ वर्त्तमानत्वात् संयोगादिसम्बन्धावच्छिन्नघटाद्यभावोऽपि स्पन्दादौ न तिष्ठेदिति भावः। यदि च प्रतियोगितावच्छेदकसम्बन्धस्य संसर्गतानियामकसम्बन्धेन अभावविरोधित्वमुच्यते तदा मयापि प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिनस्तथात्वमित्याह सम्बन्धविशेषेणेति। अन्योन्याभावात्यन्ताभावसाधारणेत्युक्तिलब्धमनुगतत्वं निरस्यति अनतीति। यथाकथञ्चित् प्रतियोगितावच्छेदकसम्बन्धमात्रस्यैव तथात्वे संयोगेन घटाद्यभावः कपालादौ न स्यात्। प्रतियोगितावच्छेदकीभूतस्यैव घटसमवायस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र सत्त्वात् अतः स्वप्रतियोगितावच्छेदकसम्बन्धस्यैव तथात्वं वाच्यमिति ।

ननु प्राचां मते स्वत्वमनुगतमेव इत्युक्तावपि आह व्यधिकरणेति । संयोगसम्बन्धावच्छिन्नघटाद्यभावस्थले प्रतियोगिनिरूपितस्यैव संयोगस्य प्रतियोगितावच्छेदकसम्बन्धत्वमावश्यकं न तु प्रतियोग्यनिरूपितस्य मानाभावादित्युक्तौ नैष दोषः सम्भवतीति व्यधिकरणपर्य्यन्तानुसरणम् । तद्वतीति व्यधिकरणसंयोगवति । तत्सम्बन्धावच्छिन्नरूपाद्यभावस्य विलयप्रसङ्ग इति भावः । अभावविरोधिनः प्रतियोगितावच्छेदकसम्बन्धस्य तत्र सत्त्वादिति भावः ।

ननु प्रतियोगिनिरूपितस्यैव प्रतियोगितावच्छेदकसम्बन्धस्य तथात्वं वाच्यम् । न तु प्रतियोगिनिरूपितो व्यधिकरणसम्बन्धोऽस्तीति अतो न तदवच्छिन्नाभावस्य विलय इत्यत आह भवतामिति । तदभावेति व्यधिकरणसम्बन्धावच्छिन्नाभावस्याभावः त्वन्मते न स्यात् प्रतियोगिनिरूपिततादृशसम्बन्धस्य अप्रसिद्धत्वात् । अस्माकन्तु गगनस्य स्वाभावविरहत्ववत् प्रतियोगिन एव तादृशाभावविरहत्वं तथाविधाभावस्य अनभ्युपगम एव नेति भावः ।

न च प्रतियोगिनः स्वाभावविरहत्वेन संयोगसम्बन्धावच्छिन्नघटाभावः कपाले नास्तीति प्रमा स्यात् घटात्मकतादृशघटाभावविरहस्य समावायेनैव कपाले सत्त्वात् इति वाच्यम् । कपालस्य समवायेन घटत्वावच्छिन्नवत्त्वेऽपि समवायेन संयोगसम्बन्धावच्छिन्नघटाभावाभावत्वावच्छिन्नवत्त्वाप्रसिद्धेरव ताद्रूप्येण प्रमात्वासम्भवात् संयोगादिसम्बन्धेनैव तादृशघटाभावाभावत्वावच्छिन्नाधिकरणतायाः पारमार्थिकत्वात् तद्धर्मप्रकारेण प्रमात्वस्य तद्धर्मावच्छिन्नवद्विशेष्यकत्वघटितत्वात् । अन्यथा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशिष्टसत्तायाः सत्तानतिरिक्तत्वेन गुणो विशिष्टसत्तावान् इत्यादिप्रतीतेः प्रमात्वापत्तिरिति ध्येयम्। परिष्कुरुते इति लक्ष्याप्रसिद्धिनिबन्धनस्य असम्भवस्य विशेषणान्तरप्रक्षेपेण वारणमेवास्य परिष्कारः। न चेद्व तथेति। न चाकाशवति आकाशाभावस्य असत्त्वप्रतीतिराकाशवत एवाप्रसिद्धत्वादित्यर्थः। अन्यथा प्रमेयत्वाद्यभावत्वमपि गगनादेः स्यादविशेषादिति भावः। ननु प्रतियोगित्वान्यथानुपपत्त्यैव गगनस्य अभावाभावत्वं सेत्स्यतीत्यत आह अभावप्रतियोगित्वमिति। उक्तमिति अभावविरहत्वस्य प्रतियोगितात्वे भेदप्रतियोगितत्त्वावच्छेदकयोरतिव्याप्त्यापत्तेरिति भावः।

ननु यो यदत्यन्ताभावस्य प्रतियोगी सोऽवश्यं तदत्यन्ताभावस्याभाव इति सामान्यव्याप्त्या गगनाभावप्रतियोगित्वहेतुनैव गगनस्य स्वाभावाभावत्वं साधनीयमत आह अभावप्रतियोगित्वमिति अत्यन्ताभावप्रतियोगित्वमित्यर्थः। तेन भेदस्य प्रतियोगिनि न व्यभिचारः। अप्रयोजकमिति यत्तदर्थयोरननुगतत्वेन सामान्यव्याप्तेरसत्त्वादिति भावः। तत् किं वृत्तिमत्पदमफलमेव इत्याशङ्कायामाह एवञ्चेति। तथाच उद्वर्त्तो हि ग्रन्थ इत्यादि न्यायात् सम्बन्धविशेषावच्छिन्नप्रतियोगितालाभार्थमेव वृत्तिमत्पदमिति भावः। नव्याः पुनराकाशाभावो यद्यपि विशिष्टस्वभावात्मकस्वप्रतियोगिस्वरूपाभावस्य प्रतियोगी तथापि विशिष्टाभावात्मकस्वप्रतियोगिस्वरूपाभावो न वृत्तिमान् न प्रतियोग्यनधिकरणे वृत्तिमान् वृत्तिमत्पदेन प्रतियोग्यनधिकरणवृत्तिमत्त्वस्यैव उक्तत्वात् इत्येवं क्रमेण मूलव्याख्याने गगनस्य स्वाभावाभावत्वविरहेऽपि न मूलासङ्गतिरित्याहुः।

सम्बन्धनिवेशस्य फलमाह अतएवेति। ज्ञानस्य समवाय-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्बन्धेन अभावप्रतियोगित्वेऽपि विषयतया केवलान्वयित्वमिति योजना। अत्र ज्ञानं सर्वगोचरं ग्राह्यम्। तत्तन्मात्रविषयकज्ञानस्य विषयतासम्बन्धेन सर्वत्र असत्त्वात् तस्य अलक्ष्यत्वादिति ध्येयम्।

साक्षात्सम्बन्धेन केवलान्वयित्वमुक्त्वा परम्परासम्बन्धेन तमाह ज्ञानत्वस्येति। समवायेन अभावप्रतियोगित्वेऽपि स्वाश्रयविषयत्वरूपपरम्परासम्बन्धेन केवलान्वयित्वमित्यन्वयः। स्वाश्रयविषयत्वादिसम्बन्धस्य वृत्त्यनियामकतया तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या तत्सम्बन्धेन ज्ञानत्वादेः केवलान्वयित्वासम्भवमनुसृत्याह ज्ञानविषयत्वादेश्चेति। आदिना गगनाद्यभावस्य सङ्ग्रहः। तेन विषयभेदेन विषयताया अननुगतत्वेन अलक्ष्यत्वेऽपि न क्षतिः। वक्ष्यमाणावच्छेदकगर्भलक्षणाभिप्रायेण ज्ञानविषयत्वस्य उपादानमित्यपि कश्चित्। व्यधिकरणेत्युपलक्षणम्। समानाधिकरणकालिकादिसम्बन्धेनापि गगनादौ ज्ञानविषयत्वादेरभावसम्भवादिति ध्येयम्।

संयोगाद्यभावेति। यद्यपि प्रमेयत्वादेरपि वैशिष्ट्याद्यवच्छिन्नाभावाप्रतियोगित्वात् असम्भववारणाय इत्येव वक्तुमुचितं तथापि विशेष्यादिमति विशिष्टाभावादेर्न विशेष्यादिप्रतियोगित्वमिति प्राचां मतेन वैशिष्ट्याद्यनवच्छिन्नप्रतियोगित्वनिवेशाभिप्रायेण वा संयोगाभावानुसरणम्। प्रतियोग्येति प्रतियोग्यनधिकरणवृत्तित्वेनेत्यर्थः। तथा च स्वावच्छेदकसम्बन्धेन स्वाश्रयानधिकरणवृत्त्यभावीयतत्सम्बन्धावच्छिन्नप्रतियोगित्वाभाव एव तत्सम्बन्धेन केवलान्वयित्वमिति फलितम्। तेन घटाद्यभावस्यैव घटादिविशिष्टवाच्यत्वाद्यभावत्वमतेऽपि न प्रतियोग्यनधिकरणवृत्त्यभावस्याप्रसिद्धिः। स्वपदस्य अग्रिमप्रतियोगित्वपरत्वादिति ध्येयम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु गगनस्याधिकरणस्य अप्रसिद्धया तदभावस्य प्रतियोगि-वैयधिकरण्यविरहात् तादृशघटाद्यभावस्य अप्रतियोगित्वं गगनस्यापीति तत्रातिव्याप्तिः। स्वरूपसम्बन्धात्मनः प्रतियोगित्वस्य प्रतियोगिभेदेन भिन्नतया द्रव्यसामान्याभावीयस्यापि गगननिष्ठप्रतियोगित्वस्य अतथात्वात् तदाश्रयस्य गगनस्याधिकरणस्य अप्रसिद्धेः अभावविरहत्वरूपप्रतियोगित्वस्य लक्षणघटकत्वे द्रव्यसामान्याभावाभावत्वविरहेण प्रतियोगित्वासम्भवाच्च इत्यत आह आकाशाभावोऽपीति। तथाच यादृशसम्बन्धसामान्ये यद्‌यत्प्रतियोगिताश्रयप्रतियोगिकत्व-यत्किञ्चिदधिकरणानुयोगिकत्वोभयाभावः तत्तत्प्रतियोगित्वाभावकूटवत्त्वं तादृशसम्बन्धेन केवलान्वयित्वं वाच्यम्। गगनस्य तादृशप्रतियोगितासत्त्वात् न केनापि सम्बन्धेन तस्य केवलान्वयित्वमिति भावः। उभयाभावस्य अप्रवेशेन लाघवं वृत्तिमत्पदस्य सार्थक्यञ्च कुर्वन्नाह वृत्तिमत इति।

तादृशेति। प्रतियोगिव्यधिकरण इत्यर्थः। तथा च यथाश्रुतमेव प्रतियोगिवैयधिकरण्यं निवेशनीयम्। वृत्तिमत्त्वविरहात् गगनादौ नातिप्रसङ्गः। वृत्तिमत्त्वञ्च केवलान्वयिताघटकसम्बन्धेन ग्राह्यम्। तेन समवायेन वृत्तिमतोऽपि घटत्वादेः संयोगसम्बन्धावच्छिन्नप्रतियोगिव्यधिकरणाभावाप्रतियोगित्वेऽपि न तस्य संयोगेन केवलान्वयित्वम्। यदि च ज्ञानत्वादेः स्वाश्रयविषयत्वादिसम्बन्धेन इव स्ववृत्तिप्रमेयत्ववत्त्वादिसम्बन्धेनापि केवलान्वयित्वम् एकशेषस्य दुःशक्यत्वात्। तथाच तादृशसम्बन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धया तत्राव्याप्तिरिति विभाव्यते तदा यत्सम्बन्धावच्छिन्नयद्वन्निष्ठ-प्रतियोगिव्यधिकरणाभावस्य प्रतियोगित्वाभाववत्त्वावच्छेदेन प्रतियोगिव्यधिकरणाभावप्रतियोगित्वाभाववत्त्वं तत्सम्बन्धेन

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत् केवलान्वयीति वाच्यम्। प्रतियोगिताद्वयञ्च तत्र विशेषणताविशेषावच्छिन्नं ग्राह्यम्। अतो न कश्चिद् दोष इति ध्येयम्।

व्याप्यवृत्तित्वेति। तथा च गगनाद्यभावो व्याप्यवृत्तिरेवेति गगने नातिप्रसङ्गः। संयोगरूपस्य अभावो न तथेति तत्-प्रतियोगित्वेऽपि संयोगाद्यभावेन अप्रसङ्ग इति भावः। अत्र व्याप्यवृत्तित्वं यदि अवच्छिन्नवृत्तिकान्यत्वं तदा संयोगस्य केवलान्वयित्वापत्तिः तदभावस्य अवच्छिन्नवृत्तिकत्वात्। न च निरवच्छिन्नवृत्तिकत्वमेव व्याप्यवृत्तित्वं वाच्यम्। अवच्छेदकत्वादिसम्बन्धेनैव मूलादौ निरवच्छिन्नवृत्तिकस्य संयोगादेः प्रतियोगित्वेन संयोगाद्यभावाव्याप्तितादवस्थ्यात्। न च विशेषणताविशेषेण निरवच्छिन्नवृत्तिकत्वं तथा घटाद्यभावस्यापि केवलान्वयित्वापत्तेः घटादिरूपस्य तदभावस्य विशेषणतया वृत्तित्वविरहात्। एवं द्वित्वावच्छिन्नस्यैव प्रमेयत्वादेरभावस्य व्याप्यवृत्तित्वात् तत्प्रतियोगित्वेन असम्भवश्च स्यात् इत्यस्वरसः कश्चिदित्युक्त्या सूचितः।

ननु वृत्त्यनियामकेन स्वविषयतातादात्म्येन प्रतियोगिव्यधिकरणत्वाप्रसिद्ध्या तेन सम्बन्धेन नित्यज्ञानादेरभिधेयस्य कुतः केवलान्वयित्वमत आह तादात्म्येनेति स्वविषयतातादात्म्येनेत्यर्थः। यथाश्रुते अभिधेयमात्रस्य एव तत्तद्व्यक्तित्वावच्छिन्नभेदप्रतियोगितया तादात्म्येन कस्यापि अभिधेयस्य न यावद्वृत्तित्वं कुत्रापि अव्याप्तिशङ्का स्यादिति ध्येयम्। नव्यास्तु तथाच इत्यग्रिमग्रन्थोत्तरमेव अयं पाठः। तत्र अनवच्छेदकगर्भलक्षणे अभिधेयत्वादिप्रकारेण वस्तुमात्रस्यैव तादात्म्येन केवलान्वयित्वसम्भवादिति प्राहुः।

अखिलमिति। प्रतियोग्यसमानाधिकरणेत्यत्र प्रति-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योग्यसम्बन्धित्वं वृत्तिमत इत्यत्र च सम्बन्धितामात्रं निवेश्यम् अत्यन्ताभावत्वादिकञ्च न प्रवेश्यमिति भावः। मूले प्रमाजातीयेति। घटत्वाद्येकतरप्रमामुपादाय भ्रमसामान्यभिन्नत्वेन तत्सजातीयस्य ज्ञानस्य विषयत्वमेव प्रमेयत्वं वाच्यमित्यर्थः। प्रमाजातीयत्वोक्त्यापि न प्रतियोगित्वगर्भलक्षणस्य प्रतीकारः विषयत्वस्य नानात्वात्। अतः प्रमाजातीयत्वेन अनुगमं कुर्वाणस्य मूलकृतोऽनवच्छेदकत्वगर्भलक्षणे तात्पर्य्यं अवधार्य्य व्याचष्टे तथा चेति।

अत्र गुरुधर्मस्यापि प्रतियोगितावच्छेदकत्वोपगमात् न प्रमेयधूमत्वादिप्रकारेण धूमादेः केवलान्वयित्वं सिद्धान्तलक्षणोक्तरीत्या प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव वा तदवच्छेदकत्वं वाच्यम्। इत्यञ्चेति अवच्छेदकत्वनिवेशी चेत्यर्थः। तेनेति। अन्यथा द्रव्यभेदगुणभेदोभयत्वावच्छिन्नाभावस्य प्रतियोगिसमानाधिकरणत्वात् तदसमानाधिकरणस्य अभावान्तरस्य प्रतियोगितानवच्छेदकमेव तादृशोभयत्वं तादृूप्येणापि केवलान्वयित्वं स्यात् इति भावः। वृत्तिमत इत्यादि द्वितीयमतमालम्ब्य शङ्कते न चेति वाच्यमित्यग्रेऽन्वयः। एवमिति प्रतियोगितावच्छेदकावच्छिन्नस्य असामानाधिकरण्यप्रवेशी इत्यर्थः।

यथाश्रुते तु विरुद्धयो र्द्वयोरपि प्रतियोग्यनधिकरणवृत्तिं प्रति एकाभावप्रतियोगित्वेनैव अतिव्याप्त्यसम्भवात् इति भावः। तादृशधर्मावच्छिन्नस्येति निरुक्तप्रतियोगितानवच्छेदकधर्मावच्छिन्नस्येत्यर्थः। विवक्षितत्वादिकस्य वृत्तिमत्पपदेन इत्यादि। तस्येति विरुद्धगोत्वाश्वत्वाद्युभयत्वस्य अतथात्वात् यत्किञ्चिद्व्यक्तिनिरूपितवृत्तिनानवच्छेदकत्वात्।

वस्तुतः अत्रापि यत्सम्बन्धेन यद्रूपावच्छिन्नस्य अधिकरणे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्त्तमानस्य अभावस्य दैशिकविशेषणतावच्छिन्नप्रतियोगिताऽनवच्छेदकसामान्यं दैशिकविशेषणतावच्छिन्नप्रतियोगितानवच्छेदकं तत्सम्बन्धेन तद्रूपावच्छिन्नं केवलान्वयीत्येव वक्तव्यम्। अन्यथा स्ववृत्तिप्रमेयवत्त्वादिसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्याप्रसिद्ध्या तादृशसम्बन्धेन केवलान्वयिनि ज्ञानत्वादौ उक्तलक्षणस्य अव्याप्तिप्रसङ्गादित्यवधेयम्। ननु संशयस्य अनुमित्यनुपयुक्तत्वात् तथापीत्यादिमूलासङ्गतिः। अत आह सन्दिग्धेति। तथाच सिद्धिदशायामनुमिति वारणाय पक्षताविधयैव संशयस्योपयोग इत्याशङ्कितुरभिप्रायः। कालसम्बन्धित्वरूपस्य अस्तित्वस्य केवलान्वयितया तत्साध्यकस्य अन्वयव्यतिरेकित्वं मूलोक्तमसङ्गतम्। अतो व्याचष्टे घटास्तित्वेति। घटवृत्तितेति तदर्थः। साध्यसंशयस्य निश्चयं प्रति अविरोधित्वात् व्याचष्टे साध्यसिद्धेति। तथाच मूले साध्यसिद्ध्या यो विरोधः तदानित्यन्वयः। न तु साध्यसिद्धि विरोधिनी यस्येति बहुव्रीहिः परपदे पुंवद्भावायोगात् नित्यं कप्रत्ययापाताच्च। साध्यसिद्धिपदञ्च साध्यधर्मिकपक्षवृत्तित्वनिश्चयपरं नातः केवलान्वयिनि साध्याभावाप्रसिद्ध्या साध्याभावाप्रकारकसाध्यप्रकारकज्ञानपर्य्यवसितायाः साध्यसिद्धेः पुनरप्रसिद्धितादवस्थ्यमिति भावः।

वस्तुतः साध्यनिष्ठप्रकारत्वान्यप्रकारत्वानिरूपितपक्षनिष्ठविशेष्यताकत्वमेव साध्यनिश्चयत्वं वाच्यम्। अन्यथा वाच्यं पक्षीकृत्य ज्ञेयस्य तादात्म्येन साध्यतायां तादृशसम्बन्धेन वाच्यवृत्तित्वाभावस्य अप्रसिद्ध्या कथितक्रमेण अप्रसिद्धितादवस्थ्यम्। ननु साध्यं पक्षवृत्ति न वा इत्यादि संशयस्य असङ्ग्रहः भिन्नप्रकारकतया तस्य साध्यवत्त्वनिश्चयानिवर्त्यत्वात् अतः प्राचां मतेनोपगृह्णाति विशेषणेत्यादि। भेदेऽपीत्यपिना प्रमेयत्वं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्षवृत्त्यभावप्रतियोगि न वा इत्यादिमूलोक्तस्थले विषयभेदस्यापि सङ्ग्रहः। विरोधीति विरोधिनी तत्तत्संशयानुपपत्तिप्रयोजिका या विषयता तन्मात्रेणेत्यर्थः। न तु विरोधिनी विषयतामात्रेणेत्यर्थः। तथा सति प्रमेयत्वं पक्षवृत्ति न वा पक्षवृत्त्यभावप्रतियोगि न वा इत्यादिसंशयस्य पक्षः प्रमेयत्ववान् इत्यादिनिश्चयानिवर्त्त्यत्वे प्रकृतासङ्गतिप्रसङ्गादिति ध्येयम्।

पक्षनिष्ठाभावाप्रतियोगित्वज्ञानं न साध्यसाधकं अबाधितत्वबुद्धेरनुमित्यहेतुत्वात् हेतुत्वेऽपि तदभावो न योग्यता इत्युभयथापि पक्षनिष्ठेत्यादिमूलासङ्गतिः। अतो व्याचष्टे पक्षेत्यादि। अग्रे तदभावस्य इत्यत्र तच्छब्देन पक्षवृत्त्यभावप्रतियोगित्वज्ञानस्यैव परामर्शे सामञ्जस्यम्। अतो विरोधित्वलक्षणं नञर्थमन्तर्भाव्य आह प्रतियोगित्वज्ञानविरोधिज्ञानस्येति।

कथञ्चित् बाधापनयनद्वारा इदञ्च भावाभावकृतं विरोधित्वमनुसृत्य वस्तुतः साध्यधर्मिकपक्षनिष्ठाभावप्रतियोगित्वज्ञानविरोधिनः परामर्शस्यैव साध्यसाधकत्वसम्भवात् यथाश्रुतमेव न्यायः। साध्यसाधकत्वं यथाश्रुतमेव विरचितेषु विरोधार्थकस्यापि नञो ज्ञानविरोधित्वप्रकारेण बोधकतायाम् आधुनिकलक्षणापत्तेः। पक्षान्तरमाह पक्षनिष्ठेति। तथाच घटानधिकरणमित्यादिप्रयोग इव अप्रतियोगित्वज्ञानेत्यत्रापि नञ्व्यत्यासात् ज्ञानपदेनान्वय इति भावः। द्वितीयकल्पे तदात्मकस्य अभावस्य इत्यर्थसम्भवेऽपि उभयकल्पसाधारण्यार्थं प्रक्रान्तमेव।

पक्षनिष्ठाभावप्रतियोगित्वज्ञानं तच्छब्देन परामृश्यमाह तस्येत्यादिना। धर्मान्तरे तादृशप्रतियोगित्वज्ञानदशायामपि साध्यानुमित्युत्पत्तेः साध्य इति पूरितम् तादृशप्रतियोगित्व-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानप्रतियोगिताकाभावमात्रस्य तादृशप्रतियोगित्वज्ञानदशायामपि सत्त्वादाह तादृशप्रतियोगित्वावगाहिज्ञानत्वेनेति। तादृशनिश्चयत्वेनेत्यर्थः। तेन तादृशप्रतियोगित्वसन्देहदशायां न योग्यताहानिः।

ननु एवं पक्षः साध्याभाववान् इत्यादिनिर्णयदशायामपि उक्तक्रमेण संशययोग्यता स्यात्। तथाच तत्रापि अनुमित्यापत्तिः। अत आह साध्यविशिष्टेति। अभावमात्रात्मकस्य व्यतिरेकस्य विपक्षगामित्वशङ्कानिवर्त्तकत्वासम्भवात् व्यतिरेकश्च इत्यादिमूलासङ्गतिः। अतो व्याचष्टे विपक्षे हेतोरभाव इति। ननु क्वचित् विपक्षे हेतोरभावग्रहेऽपि विपक्षवृत्तित्वशङ्कोत्पादात् विपक्षत्वावच्छेदेन हेत्वभाववत्त्वं वाच्यम्। तच्च व्यतिरेकव्याप्तिपर्य्यवसितं न तु स्वात्मिकायां व्यतिरेकव्याप्तौ उपयुज्यते इति मूलासङ्गतिः। अतो व्याचष्टे साध्याभावहेत्वभावयोरिति। तथाच व्यतिरेकव्याप्तेः स्वस्मिन् अनुपयुक्तत्वेऽपि साध्यान्वयव्याप्तौ व्यभिचारशङ्कानिरासद्वारा उपयोगः भिन्नप्रकारकस्यापि ज्ञानस्य विरोधित्वोपगमादिति भावः।

केचित्तु व्यतिरेको यदि अभावमात्रं व्यतिरेकव्याप्ति र्वा उभयथापि तद्बुद्धे र्न विपक्षवृत्तित्वशङ्कानिवर्त्तकत्वं भिन्नप्रकारकत्वात् अतो व्याख्यातं विपक्षे हेतोरभाव इति हेतोर्विपक्षवृत्तित्वाभाव इति तदर्थः। व्यभिचारशङ्काया न व्यतिरेकव्याप्तिविरोधित्वं भिन्नप्रकारकत्वात्। अतस्तन्निरासद्वारा विपक्षवृत्तित्वाभावस्य सुतरां व्यतिरेकव्याप्तौ उपयोगो न सम्भवति। अतो व्याचष्टे साध्याभावहेत्वभावयोरितीत्याहुः। तच्चिन्त्यम्। अत्रेति शङ्का इयं नव्यनैयायिकानां न तु गुरूणां तैरनौपाधिकत्वस्य व्याप्तित्वस्वीकारात्। अतएव गुरूणां

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याप्यतावच्छेदकप्रकारकज्ञानस्यैव अनुमितिहेतुतया प्रायश: साधनभेदेऽपि इत्याद्यग्रिमग्रन्थासङ्गतिरित्यपि परास्तमित्यपि ध्येयम्।

साध्येति। अत्र साध्याभावस्य अधिकरणत्वं निरवच्छिन्नं ग्राह्यम्। तेन कपिसंयोगादिसाध्यकस्य एतद्वृक्षत्वादे र्नासङ्ग्रह:। तदपि वा केवलान्वयिनां पथि प्रस्थाप्यं इत्यवधातव्यम्। व्याप्तिरिति प्रकारतया अनुमितिजनकतावच्छेदकमित्यर्थ:। व्याप्तिर्व्याप्नोतिः शक्यं केवलान्वयिनि तु न व्याप्यव्यवहारोऽपीत्यपि कश्चित्।

लाघवादिति। पक्षधर्मिकसाध्याभाववदवृत्तिमत्तानिश्चयोत्तरानुमितित्वावच्छिन्नं प्रति तादृशनिश्चयत्वेन हेतुतायाम् अवच्छेदकलाघवादित्यर्थ:। पक्षधर्मिकस्वव्यापकसाध्यसमानाधिकरणहेतुमत्तानिश्चयोत्तरानुमितित्वावच्छिन्नं प्रति तादृशहेतुमत्तानिश्चयत्वेन कारणतायान्तु पूर्वापेक्षया अवच्छेदकगौरवादिति भाव:। साध्याभाववदवृत्तित्वावच्छिन्नप्रकारकनिश्चयत्वेन एकरूपेण धूमालोकादिनानालिङ्गकपरामर्शस्य तादृशनिश्चयोत्तरानुमितित्वावच्छिन्नं प्रति हेतुत्वम्। अत: साधनविशेषाप्रवेशप्रयुक्तलाघवमप्यस्ति इत्याह प्रायश इति।

साध्याभाववदवृत्तित्वं न साध्याभाववति सम्बन्धसामान्येन अवर्त्तमानत्वम्। तद्ग्रहेऽपि पक्ष: साध्याभाववदसंयुक्तवान् साध्याभाववदसमेतवान् इत्यादिज्ञानादेव साध्यानुमितेरानुभविकत्वात्। एवञ्च भिन्नसम्बन्धेन हेतुतास्थले साध्याभाववदवृत्तित्वस्थलमस्माकं नाना इत्याशयेन प्रायश इत्युक्तम्। न च साध्याभाववदवृत्तित्वज्ञानस्य साधनविशेषसन्तर्भाव्य अहेतुत्वे वह्न्यभाववदसंयुक्तधूमवान् पर्वत इत्यादिपरामर्शस्य धूमवत्त्वाद्यंशे भ्रमत्वग्रहेऽपि पर्वतो वह्निमान् इत्यनुमिति:

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यादिति वाच्यम्। इष्टत्वात् यादृशवस्तुविषयकत्वेन अनुमितिहेतुत्वं तदघटितभ्रमत्वग्रहस्यैव अनुमितिप्रतिकूलत्वात्। अन्यथा धूमसामान्यव्यापकवह्निसमानाधिकरणनीलधूमवान् पर्वत इत्यादिपरामर्शस्य नीलांशे भ्रमत्वग्रहदशायां तन्मतेऽपि तादृशपरामर्शात् अनुमित्यनुत्पत्तिप्रसङ्गात्।

यादृशी विषयिताव्यक्तिः अनुमितिजनकतावच्छेदिका तद्घटकपदार्थगर्भाप्रामाण्यज्ञानस्यैव उत्तेजकतया निरुक्ताप्रामाण्यज्ञानस्यापि अनुमितिविरोधित्वसम्भवाच्च तत्रत्यायाः साध्याभाववदवृत्तिधूमत्वावच्छिन्नविषयताया एव तादृशावृत्तित्वावच्छिन्नविषयतात्वादिति ध्येयम्। यद्यपि धूमलिङ्गकत्वावच्छिन्नविषयतात्वादिति ध्येयम्। यद्यपि धूमलिङ्गकवह्न्यनुमितित्वावच्छिन्नं प्रति आलोकलिङ्गकानुमित्सायाः प्रतिबन्धकतया तदभावदशायां वह्न्यभाववदवृत्तिमान् पर्वत इत्येवं निश्चयादपि धूमलिङ्गकवह्न्यनुमितिप्रसङ्गः।

पक्षधर्मिकसाध्याभाववदवृत्तिधूमवत्तानिश्चयोत्तरानुमितेरेव धूमलिङ्गकानुमितित्वेन तत्र तादृशानुमित्यनुत्पादस्य सर्वसिद्धत्वात्। तथाच तद्वारणाय पक्षधर्मिकसाध्याभाववदवृत्तिधूमादिमत्तानिश्चयत्वेन तादृशनिश्चयोत्तरानुमितित्वावच्छिन्नं प्रति हेतुत्वं वाच्यमिति। साध्याभाववदवृत्तित्वज्ञानस्य हेतुत्वमतेऽपि साधनभेदेन भिन्न एव कार्य्यकारणभावः तथापि तल्लिङ्गकानुमितौ तदन्यलिङ्गकानुमित्सायाः कामिनीजिज्ञासादिवत् स्वातन्त्र्येण प्रतिबन्धकत्वे मानाभाव इति मतेनेयं पक्षता च गुरूणामिव नव्यानां नानुमितिहेतुः। यत्रालोकलिङ्गकेच्छासत्त्वेऽपि धूमालोकोभयपरामर्शदशायां धूमलिङ्गकानुमितिरुत्पादात् आलोकलिङ्गकपरामर्शाभावविशिष्टाया एव आलोकलिङ्गकानुमित्साया धूमलिङ्गकानुमितिविरोधित्वं वाच्यम्। तथाच पर्वतधर्मिकवह्न्यनुमितिसामान्यं प्रति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धूमालोकभस्मादिपरामर्शाभावविशिष्टधूमालोकभस्मादिप्रत्येकलिङ्गकानुमितित्वेन प्रतिबन्धकत्वमेव सम्यक् इति धूमलिङ्गकत्वस्य कार्य्यतानवच्छेदकत्वात् तदवच्छिन्नस्य आपादनमेव दुर्घटमिति। तच्चिन्त्यम्।

ननु व्यापकसामानाधिकरण्यव्याप्तेः प्रयोजकत्वे तत्र हेतोर्यादृशः सम्बन्धः प्रविष्टः तेन पक्षधर्मताज्ञानात् तत्र साध्यस्य यादृशसम्बन्धो निविष्टः तेनैव पक्षे साध्यस्यानुमितिः, तथैव हेतुत्वकल्पनात् त्वन्मते त्वनियमः स्यात् अत आह यत्सम्बन्धेति नातिप्रसङ्गः। नैकसम्बन्धेन निरुक्तव्याप्त्यादिग्रहात् अपरसम्बन्धेन साध्यानुमितिप्रसङ्गः। ननु यदि उक्तप्रकारिकैव व्याप्तिः तदा गगनादौ तत्प्रमातोऽपि व्याप्तिग्रहाधीनं फलं स्यात् इत्याशङ्काफलं यदि अनुमितिः तदा कारणान्तरविलम्बादेव न तत्सम्भव इत्याह आकाशादेरिति।

पक्षधर्मतेति। तत्र आकाशस्य तत्त्वेन पक्षधर्मत्वाग्रहेऽपि साध्याभाववदवृत्तित्वेन पक्षधर्मत्वग्रहसम्भवात् अयुक्तमेतत् साधनविशेषान्तर्भावेण व्याप्तिग्रहस्य हेतुतायाः साधनभेदेऽपि इत्यादिना परित्यक्तत्वादिति चिन्त्यम्। व्याप्यव्यवहारस्य फलत्वे तु आह निविशतामिति। तथाच साध्यसामानाधिकरण्यविशिष्टमेव तद्व्याप्यताव्यवहारौपयिकम्। अतो न गगनादौ वह्न्यादिव्याप्यताव्यवहार इति भावः। लाघवाद्वृत्तिमत्त्वं वेति। साध्याभाववति येन सम्बन्धेन अवृत्तित्वं तेनैव वृत्तिमत्त्वं बोध्यम्। तेन समवायादिना वृत्तिमति द्रव्यत्वादौ संयोगादिना न वह्न्यादिव्याप्यत्वव्यवहारः। अत्र एवं सति घटत्वादेः साध्यतायां पर्य्याप्तिसम्बन्धेन घटपटोभयत्वादे र्व्याप्यत्वं स्यात्। पूर्वकल्पे तु तादृशसम्बन्धेन साध्य-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामानाधिकरण्यविरहादेव व्याप्यत्वासम्भवात् तस्मात् वाका-रोऽनास्थायामिति तत्त्वम् ।

भिन्नत्वादीत्यादिना साध्याभाववदवृत्तित्वात्यन्ताभाव-सङ्ग्रहः । व्यभिचारेति व्यभिचारधीविरोधितावच्छेदकधर्म-घटितत्वेनेत्यर्थः । तेन व्यापकताधियो विरोधिताखण्डकस्य यदीत्याद्युत्तरग्रन्थस्य नासङ्गतिः । अनुगमनीयमिति । यद्यपि तादृशभिन्नत्वादिप्रकारकनिश्चयस्य स्वस्वोत्तरानुमितित्वाव-च्छिन्नं प्रत्येव हेतुत्वात् अननुगमेऽपि न क्षतिः, तथापि अत्य-न्तान्योन्याभावगर्भमन्तर्भाव्य कारणताद्वयकल्पनामपेक्ष्य लाघ-वात् साध्यव्यभिचारधीविरोधिधीविषयप्रकारकपक्षधर्मता-निश्चयत्वेन तादृशानुमितित्वावच्छिन्नं प्रत्येकमेव कारणत्वं युक्तमित्याशयेनेदम् । तच्च तादृशज्ञानविषयत्वञ्च । नचैव-मिति छेदः । वह्न्यभावेत्यादिविषयविरोधविरहादित्यन्तम् अविरोधित्वे हेतुः । स्वरूपेण धर्मान्तराविशेष्यत्वेन भासत इत्यन्वयः ।

तदवच्छेदकत्वञ्चेति । तस्य वह्नित्वस्य अवच्छेदकत्वञ्चे-त्यर्थः । निर्वह्नित्वबुद्धौ वह्नित्वावच्छिन्नप्रतियोगितात्वेन संसर्गतायां तेषामनुप्रवेशादिति भावः । तदवच्छेदकत्वत्वेति प्रतियोगितावच्छेदकत्वत्वेत्यर्थः । विषयविरोधविरहादिति समानप्रकारताकबुद्धेरेव प्रतिबन्धकत्वादिति भावः । विशि-ष्टस्य महानसीयत्वादिविशिष्टस्य । प्रकारान्तरेति हेतुमन्निष्ठा-भावप्रतियोगितात्वावच्छेदेन यादृशधर्मावच्छेद्यत्वाभावः तादृशधर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यनुसरणे चेत्यर्थः, न तु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतापर्य्याप्त्यधिकर-णान्यत्वानुसरणे इत्यर्थः । तथा सति महानसीयवह्निमान् धूमात् इत्यादौ अतिव्याप्तेः, महानसीयत्ववह्नित्वोभयोरेव

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्नाप्तावच्छेदकत्वपर्य्याप्त्यधिकरणतया तदुभयभिन्नत्वेन महानसीयत्वविशिष्टवह्नित्वप्रकारेण धूमादिव्यापकताया दुर्धरत्वापत्तेः। महानसीयवह्नित्वावच्छिन्नाभावस्यापि वह्नित्वावच्छिन्नाभावतया तत्तद्वृत्तित्वज्ञानस्यापि व्यापकताज्ञानप्रतिबन्धकत्वापत्त्या वह्नित्वपर्य्याप्तावच्छेदकताकवह्निनिष्ठप्रतियोगिताकाभाववद्वृत्तित्वस्यैव व्यभिचारतया तज्ज्ञानस्य विषयविरोधसम्भवाच्चेति ध्येयम्।

यद्वा प्रकारान्तरानुसरणे इत्यस्य साध्यतावच्छेदकतदितरोभयानवच्छेद्या या हेतुमन्निष्ठाभावप्रतियोगिता तदनवच्छेदकत्वस्य निवेशे इत्यर्थः। निर्वह्निवृत्तिर्धूम इत्यादिव्यभिचारज्ञाने वह्नित्वान्यधर्मानवच्छिन्नप्रतियोगितात्वेनैव प्रतियोगितायाः संसर्गतया भानसम्भवात् इति भावः। सुतरामिति विषयविरोधविरहादिति पूर्वेणान्वयः। धूमवन्निष्ठाभावप्रतियोगितात्वावच्छेदेन वह्नित्वावच्छेद्यत्वाभावबुद्धौ निरुक्तप्रतियोगिताधर्मिकवह्नित्वाद्यवच्छेद्यत्वग्रहस्यैव विरोधित्वादिति भावः।

केचित्तु प्रकारान्तरेति हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतापर्य्याप्त्यधिकरणघटितान्यत्वाद्यनुसरण इत्यर्थः। सुतरामिति निर्वह्निवृत्तिर्धूम इत्यादिप्रतीतौ वह्नित्वान्यधर्मानवच्छिन्नप्रतियोगितात्वेनैव संसर्गतया वह्नित्वादौ अवच्छेदकतापर्य्याप्तेरप्रवेशादित्यभिप्राय इत्याहुः। तच्चिन्त्यम्। मणिमन्त्रादिन्यायः स्वातन्त्र्य मानाभावादिति। इदमुपलक्षणम्। निरुक्तव्यभिचारधीविरोधिधीविषयत्वस्य साध्याभाववद्वृत्तित्वविशिष्टहेतुकालीनत्वादौ अतिप्रसक्तत्वात्। यत्प्रकारकनिश्चयत्वेन व्यभिचारधीविरोधित्वं तत्प्रकारकपक्षधर्मतानिश्चयत्वेनैव हेतुत्वं वाच्यम्। नचेदं व्यापकसामानाधिकरण्येऽप्यस्ति। व्यभिचारबुद्धिं प्रति व्यापकतानिश्चयत्वेन विरो-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धित्वस्य आवश्यकतया व्यापकसामानाधिकरण्यनिश्चयत्वेनापि तथात्वे मानाभावादित्यपि द्रष्टव्यम्।

वस्तुतः साध्याभाववद्वृत्तित्वात्यन्ताभावबोधस्य अनुमितिहेतुत्वं न तु साध्याभाववद्वृत्तिभिन्नत्वज्ञानस्य तथात्वम्। साध्याभाववद्वृत्तित्ववतां धर्मिणां कारणतावच्छेदकेऽनुप्रवेशे गौरवात्। अतएव साध्यवदन्यावृत्तित्वस्यापि ज्ञानं न हेतुः। साध्यवतां धर्मिणां प्रवेशेन साध्याभाववद्वृत्तित्वाभावापेक्षया गुरुत्वात् इत्यनुगम एव नोचित इति ध्येयम्। यत्र साध्याभावाद्यनुपस्थितावपि व्यापकतागोचरज्ञानादेवानुमितिः तत्र व्यभिचारात् साध्याभाववदवृत्तित्वज्ञानस्य हेतुत्वं सम्भवत्येव। नेत्यत आह व्यापकतेति। क्लृप्तकारणं विना कार्य्योत्पत्त्यसम्भवात् एतादृशस्थल एव मानाभाव इति भावः।

यत्तु ननु व्यापकसामानाधिकरण्यस्य गुरुत्वेऽपि लघोर्व्यापकत्वधियः कारणतायां बाधकाभावात् केवलान्वयिखण्डनं दुर्घटमित्याशङ्क्य व्यापकतेत्यादि ग्रन्थावतरणम्। तत्तुच्छम्। व्यापकत्वस्य साधनभेदात् नानात्वेन तदपेक्षया साध्याभाववदवृत्तित्वे लाघवस्य प्रागेव दर्शितत्वेन सन्दर्भविरोधापत्तेः। व्यापकतावगाहिज्ञानस्य हेतुत्वे साधकाभावमुक्त्वा बाधकमप्याह न वा यौक्तिकमिति। अयोगादिति यद्रूपावच्छिन्ने व्यापकतावच्छेदकत्वधीः तद्रूपावच्छिन्नप्रकारेणैव साध्यस्यानुमितेस्त्वयापि वाच्यत्वादित्याशयः।

अत एवाह अन्यथेति। यद्रूपावच्छिन्ने व्यापकतावच्छेदकत्वं गृह्यते तद्रूपानच्छिन्नप्रकारेणापि साध्यस्यानुमितौ भाने इत्यर्थः। ननु तन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकव्यापकतावच्छेदकत्वग्रहस्य स्वरूपतस्तद्रूपावच्छिन्नविधेयताकानुमितिहेतुत्वात् ज्ञातित्वेन व्यापकतावच्छेदकत्वग्रहात् न ज्ञानवान् इत्यनुमिति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भविता जातित्वस्य ज्ञानत्वमात्रावृत्तित्वात्। किन्तु ज्ञानत्वं व्यापकतावच्छेदकम् इत्याकारकग्रहादेव इत्यत आह अनुभवत्वेति। अनुभवत्वव्यापकजातित्वं सत्तादौ गुणत्वव्याप्यजातित्वञ्च रूपत्वादौ अतिप्रसक्तम्। अतो जातित्वस्य ज्ञानत्वमात्रवृत्तित्वरक्षार्थं विशेषणद्वयम्। तथात्वग्रहे व्यापकतावच्छेदकत्वग्रहे तत्प्रसङ्गादिति ज्ञानवान् इत्यनुमितिप्रसङ्गादित्यर्थः।

यद्यपि स्वरूपतस्तद्धर्मविशेष्यकं व्यापकतावच्छेदकत्वज्ञानं स्वरूपतस्तद्धर्मावच्छिन्नविधेयकानुमितौ कारणं ज्ञानत्वत्वावच्छिन्नधर्मिकञ्च व्यापकतावच्छेदकत्वज्ञानं ज्ञानत्वत्वविशिष्टज्ञानत्वावच्छिन्नविधेयताकानुमितौ हेतुरित्युक्तौ न दोषः।

न च एवं ज्ञानत्वत्वेन व्यापकतानवच्छेदकत्वग्रहदशायामपि ज्ञानवान् इत्यनुमितिप्रसङ्गः स्वरूपतो ज्ञानत्वधर्मिकव्यापकतावच्छेदकत्वग्रहस्य तदानीमपि सम्भवादिति वाच्यम्। त्वन्मते निर्वह्निवृत्ति धूम इत्याकारकव्यभिचारधियः सत्त्वेऽपि वह्न्यभाववदवृत्तिमान् पर्वत इत्याकारकज्ञानदशायामिव अस्माकमपि उक्तज्ञानदशायाम् अनुमितेरिष्टत्वात्। ज्ञानत्वत्वावच्छिन्नधर्मिकव्यापकतानवच्छेदकत्वग्रहस्य तु ज्ञानत्वत्वविशिष्टज्ञानत्वावच्छिन्नविधेयताकानुमितावेव विरोधित्वसम्भवात् तथापि व्यापकताज्ञानस्य हेतुत्वे चैत्रीयज्ञानवान् महानसीयवह्निमान् इत्याद्यनुमित्यनुपपत्तिः। चैत्रीयज्ञानत्वादेरखण्डत्वाभावेन स्वरूपतस्तद्विशेष्यकव्यापकतावच्छेदकत्वज्ञानासम्भवात् चैत्रीयज्ञानत्वत्वेन व्यापकतावच्छेदकत्वग्रहे चैत्रीयज्ञानत्ववत्वान् इत्येवानुमितिप्रसङ्गादिति ध्येयम्।

यादृशरूपावच्छिन्नाधिकरणतात्वे हेतुव्यापकतावच्छेदकत्वधीः तादृशरूपावच्छिन्नविधेयताकैव अनुमितिः फलम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतो न कोऽपि दोषः । प्रतियोगिवैयधिकरण्यस्य व्यापकतायां निवेशमपेक्ष्य साध्याधिकरणतायास्तद्घटितहेतुव्यापकत्वस्य व्याप्तौ प्रवेशेन लाघवादित्यपि वदन्ति । एतेनेति एकरूपेण केवलान्वयित्वग्रहात् अन्यरूपेण अनुमित्युत्पत्तौ अतिप्रसङ्गेन इत्यर्थः । ननु गगनाभावत्वत्वादिना केवलान्वयित्वग्रहः शुद्धगगनाभावत्वादिप्रकारेण अनुमितौ हेतुर्वाच्यः । गगनाभावत्वत्वविशिष्टगगनाभावत्वप्रकारेण अनुमितौ गगनाभावत्वत्वाश्रयत्वप्रकारेणैव केवलान्वयित्वग्रहस्य हेतुत्वात् नैकदा अवच्छिन्नानवच्छिन्नगगनाभावत्वप्रकारताकानुमितिप्रसङ्ग इति यदि ब्रूयात् तदाप्याह सर्वजनेति ।

गृह्यमाणव्यतिरेकेति । तदानीं केवलान्वयित्वाग्रहसम्पत्तये अन्यथा तत एव तत्रानुमितिसम्भवादिति । ननु एवं प्रमेयत्वादेरभावाप्रतियोगित्वग्रहदशायां घटादौ तद्वैशिष्ट्यावगाह्यनुमिति र्न स्यात् कारणबाधात् अत आह प्रमेयत्वादेश्चेति । तथाच तदानीं प्रमेयत्वादिसाध्यकानुमितिरसिद्धैवेति भावः । ज्ञेयत्वादौ घटादिवृत्तित्वाग्रहदशायां सहचारग्रहासम्भवात् केवलान्वयित्वेन घटादिवृत्तित्वानुमानासम्भवादाह कथञ्चिदिति । तथाच तद्वृत्तियत्किञ्चिद्धर्मव्यापकत्वेन समं साध्यस्य सहचारो जात्यन्यत्वादाविव मूलत इति तद्वृत्तिधर्मत्वावच्छिन्नव्यापकत्वस्य हेतुत्वे तद्दोषतादवस्थ्यमतः कथञ्चिदित्युक्तम् ।

केचित्तु तद्वृत्तिधर्मव्यापकत्वं तन्मात्रवृत्तिधर्मव्यापकत्वम् अन्यथा केवलान्वय्यन्तरे घटादिवृत्तित्वाग्रहदशायां सहचारस्थलाभावात् तथाच हेतुग्रहदशायां साध्यस्यापि प्रायशो ग्रहसम्भवात् सिद्धसाधनम् । अतः कथञ्चिदित्युक्तम् । तथाच तद्वृत्तित्वाग्रहदशायामेव अनुमितिरिति भाव इत्याहुः । तद-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नुमितिः प्रमेयत्वसाध्यकानुमितिः। अत्रेदमवधेयम् व्यापक-सामानाधिकरण्यस्य हेतुत्वेऽपि वाच्यत्वस्य व्यतिरेकित्वभ्रम-दशायां तदभाववदवृत्तित्वस्य ग्रहात् तत्साध्यकानुमितिसम्भ-वेन केवलान्वयिसाध्यकानुमितिखण्डनं दुर्घटं तार्किकैरन्यथा-ख्यात्यभ्युपगमात्।

न च वाच्यत्वादेः केवलान्वयित्वग्रहदशायां वाच्यत्वाभाव-वदवृत्तित्वग्रहासम्भवात् तदानीं वाच्यत्वाद्यनुमित्यनुत्पाद एव केवलान्वयिखण्डनस्यार्थ इति वाच्यम्। भिन्नप्रकारकज्ञानस्य अविरोधितया साध्ये वृत्तिमदभावाप्रतियोगित्वरूपकेवला-न्वयित्वस्य ग्रहे सत्यपि प्रतियोगितासंसर्गेण अभावे साध्य-वैशिष्ट्यावगाहिनः साध्याभाववदवृत्तिर्हेतुरित्याकारकज्ञानस्य उत्पत्तौ बाधकाभावात्। न च अभावे धर्मिणि साध्यताव-च्छेदकावच्छिन्नप्रतियोगित्वसंसर्गेण साध्यीयत्वाभावग्रहदशायां साध्याभाववदवृत्तित्वग्रहासम्भवात् तदानीं वाच्यत्वाद्यनुमित्य-नुत्पाद एव केवलान्वयिखण्डनग्रन्थस्यार्थ इति। साम्प्रतं अभा-वत्वसामानाधिकरण्येन तादृशाभावग्रहेऽपि अभावधर्मिकस्य तादृशप्रतियोगितासम्बन्धेन साध्यीयत्वग्रहस्य सम्भवात् अभा-वत्वावच्छेदेन तादृशसाध्यीयत्वाभावग्रहस्य च प्रमात्मकस्य दुर्घटत्वात् .संयोगादिसम्बन्धेन वाच्यत्वाद्यभाव एव तादृश-साध्यीयत्वाभावस्य असत्त्वात्।

वस्तुतस्तु अभावत्वविषयताम् अनन्तर्भाव्य साध्यतावच्छेदका-वच्छिन्नप्रतियोगितासंसर्गेण यः साध्यीयस्तद्वदवृत्तित्वज्ञानमेव लाघवात् कारणम् इत्यभावत्वावच्छेदेन प्रतियोगितासम्बन्धेन साध्यीयत्वाभावभ्रमे सत्यपि तादृशज्ञानोत्पत्तौ बाधकाभावः धर्मितावच्छेदकविशेषान्तर्भावेणैव बाधबुद्धेर्विरोधित्वात्। यत्तु साध्यतावच्छेदकधर्मेण साध्यतावच्छेदकसम्बन्धेन च अवच्छिन्नं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत् प्रतियोगित्वम् अखण्डं तत्सम्बन्धेन अभावे साध्यवैशिष्ट्यावगाहिन एव साध्याभाववद्वृत्तित्वज्ञानस्य अनुमितिहेतुत्वं लाघवात् न तु साध्यतावच्छेदकधर्मावच्छेद्यत्वं प्रतियोगित्वञ्च विशेष्यविशेषणभावापन्नमवगाहमानस्य साध्याभाववद्वृत्तित्वज्ञानस्य तथात्वं गौरवात्। तथाच स्वरूपसम्बन्धेन वाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताव्यक्तेरलीकतया तत्सम्बन्धेन अभावे वाच्यत्ववैशिष्ट्यावगाहिवाच्यत्वाद्यभाववद्वृत्तिज्ञेयत्वमित्याकारकज्ञानस्यापि अलीकत्वम्। असतः संसर्गस्यापि अन्यथाख्यातिनिरासादिमतः कारणस्यैव बाधात् केवलान्वयिसाध्यकानुमानस्य खण्डनमिति। तन्न। घटादिपक्षकवाच्यत्वाद्यनुमितेरानुभविकत्वे वाच्यत्वत्वाद्यवच्छिन्नत्वं प्रतियोगित्वे प्रतियोगित्वञ्च अभावांशे संसर्गमर्य्यादया विषयीकुर्वाणस्यैव वाच्यत्वाभाववद्वृत्तित्वज्ञानस्य अन्यथाख्यातिरूपस्य तत्र हेतुत्वसम्भवेन कारणबाधस्य असम्भवात्। साध्यादिभेदेन अनुमितिव्याप्तिज्ञानयोः कार्य्यकारणभावभेदात् वह्न्याद्यनुमितौ वह्नित्वाद्यवच्छिन्नाखण्डप्रतियोगितासम्बन्धेन वह्नीयाभाववद्वृत्तित्वज्ञानत्वेनैव हेतुतालाघवस्य वाच्यत्वादिसाध्यकस्थले अकिञ्चित्करत्वात्। तस्मात् केवलान्वयिनो वाच्यत्वादेः साध्यविषयानुमित्यनुभवाभाव एव केवलान्वयिखण्डनपदार्थः। तदुक्तं दीधितिकारैः। ननु ज्ञेयत्वादिहेतुका तदनुमितिरानुभविकीति। एतेन साध्यादिभेदेन व्याप्तिज्ञानानुमित्योः कार्य्यकारणभावभेदात् वह्निविधेयकानुमितौ वह्न्यभाववद्वृत्तित्वज्ञानस्य हेतुत्वेऽपि ज्ञेयत्वादिलिङ्गकवाच्यत्वादिसाध्यकानुमितौ ज्ञेयत्वादिव्यापकवाच्यत्वादिसामानाधिकरण्यधियः कारणत्वे बाधकाभावः कार्य्यकारणभावान्तरापत्तिभिया तदुपेक्षणे द्रव्यत्वादेरपि अनुमितिर्न स्यात्। द्रव्यत्वादिविधेयकानुमितिं प्रति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रव्यत्वाद्यभावः वदवृत्तित्वज्ञानस्य कारणतान्तरकल्पनायां गौरवात् इत्यस्यापि सुवचत्वात् इत्यपि निरस्तम्। द्रव्यत्वादिविधेयकानुमितेरानुभविकत्वेन तत्र कारणान्तरकल्पनस्य प्रामाणिकत्वात्। वाच्यत्वादिविधेयकानुमितेस्तु निष्प्रामाणिकत्वात्। तत्र विशेषतोऽपि व्यापकसामानाधिकरण्यधियः कारणत्वस्य उन्मत्तमात्रकल्प्यत्वात्। अन्यथा निर्वह्निधर्मिकवह्निविधेयकानुमितिमपि अङ्गीकृत्य तत्रापि निर्वह्निधर्मिकवह्निव्याप्यधूमवत्तादिपरामर्शस्य हेतुतायाः कल्पनापत्तेरिति दिक्।

केवलान्वयिनं निरस्य केवलव्यतिरेकिणं निरस्यति एवमिति। गौरवादित्यस्य साध्याभाववदवृत्तित्वज्ञानापेक्षया इत्यादिः। ननु साध्यवदन्यावृत्तित्वज्ञानस्यैव व्यतिरेकव्याप्तिग्रहस्यापि व्यभिचारधीविरोधित्वेन अनुमितिहेतुत्वं साधनीयम् अत आह व्यभिचारेति। अविरोधं व्युत्पादयति वह्न्यभावेति। वह्न्यभाववति धूमाभावो नास्तीति धीः अभावे धूमाभावप्रतियोगिकत्वावगाहिनी धूमाभावेऽपि वह्न्यभाववदवृत्त्यभावप्रतियोगित्वमवगाहते इति तस्या एव विरोधिविषयकत्वमात्रेण व्यतिरेकव्याप्तिग्रहे कदाचित् प्रतिबन्धकत्वमुचितम्।

वस्तुतस्तु तदप्ययुक्तं संसर्गविधया प्रतियोगित्वग्रहे प्रतियोगित्वाभावप्रकारिकाया व्यतिरेकव्याप्तिधियो विरोधित्वासम्भवात्। वह्न्यभाववति धूम इत्येवं व्यभिचारग्रहे तु व्यतिरेकव्याप्तिग्रहस्य विरोधित्वं सुदूरपराहतम्। वस्तुगत्या धूमाभावाभावात्मकस्य धूमस्य विषयत्वेऽपि धूमाभावाभावत्वेन अप्रकारत्वादित्यखण्डनार्थः। ननु व्यतिरेकव्याप्तिग्रहोत्तरं जायमानबुद्धेः प्रत्यक्षादिभिन्नानुभवत्वेन अनुमितित्वसिद्धौ अनायत्या व्यतिरेकव्याप्तिज्ञानस्य हेतुत्वं सेत्स्यतीति अतस्तत्रैव

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बाधकमाह व्यतिरेकेत्यादि। तत्त्वेन अनुमितित्वेन। क्रमिकानुमितिव्यक्तिपूर्वपूर्वानुमितौ परमते स्वमतेऽपि प्रवृत्तिजनकानुमितौ च व्यभिचारात् हेत्वन्तरमाह क्लृप्तेति। सामग्रीति क्वचित् व्यतिरेकव्याप्ते र्ज्ञानं हेतुरित्येवं कल्पनायाः फलीभूतज्ञानानुमितित्वानुभवाधीनत्वात् तस्य च प्रकृते अभावादिति भावः।

विजातीयेति धीरित्यनुषज्यते। वैजात्यम् अर्थापयामि नानुमिनोमि इत्यनुभवादेव सिद्धम्। व्यतिरेकव्याप्तिग्रहस्य जन्यतावच्छेदकत्वेनैव तत्सिद्धिः। प्रत्यक्षादिभिन्नानुभवत्वस्य तथात्वे गौरवादित्यपि वदन्ति। ननु एवं साध्याभाववद्वृत्तित्वस्य व्यतिरेकव्याप्तेश्च युगपत् परामर्शे अनुमित्यर्थापत्त्योः सङ्करः स्यात् अत आह क्लृप्तप्रमाणेति। तथाच प्रत्यक्षानुमित्यो र्युगपत् सामग्रीसमवधाने यथानुभवसिद्धं तदेकतरसामग्र्या अपरप्रतिबन्धकत्वं तथैव प्रकृतेऽपि वाच्यम्। यदि अपरैः ज्ञानद्वययौगपद्यस्य अङ्गीकारात् विजातीयज्ञानद्वयमेव तत्र उत्पद्यते इत्याशयः। नातः प्रतिबध्यप्रतिबन्धकभावान्तरकल्पनागौरवमपीति भावः।

अनुत्पादादिति। पक्षताजन्यत्वे हेतुः। सापि अर्थापत्तिरपि। लाघवादिति अन्वयपरामर्शसहितपक्षताजन्यत्वापेक्षया इत्यादिः। एवं पक्षताजन्यत्वमात्रस्य प्रयोजकत्वे समवायसम्बन्धावच्छिन्नस्यैव पक्षताजन्यत्वस्य प्रयोजकत्वोक्त्या पक्षताप्रत्यक्षस्य वारणसम्भवेऽपि वस्तुगतिमनुरुध्य समाधत्ते इच्छासत्त्वेऽपीति। देशान्तरेति इच्छाशून्यात्मनि तस्याः पक्षताया निरस्तत्वादिति। प्रमाणाभावेनेत्यादिः तथाच दृष्टान्तासिद्धिरिति भावः। ननु सिद्धिकालीनायाः प्रत्यक्षादिसामग्र्यास्तत्तद्व्यक्तित्वेन अनुमितौ प्रतिबन्धकत्वकल्पनापेक्षया

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लाघवादेव सिद्ध्यभावरूपपक्षतायास्तद्धेतुत्वं सेत्स्यतीति। अत आह साध्यादीति। आदिना सिषाधयिषोपग्रहः। तथाच साध्यादिभेदादिव अनुमितित्वार्थापत्तित्वादिप्रकारकसिषाधयिषाया भेदादपि पक्षताभेदात् अनुमितित्वादिप्रकारकेच्छाविरहघटितपक्षताजन्यत्वं यदि प्रयोजकं तदा अर्थापत्तौ स्वरूपासिद्धिरर्थापत्तित्वादिप्रकारकेच्छाविरहघटितजन्यत्वस्य प्रयोजकत्वेऽपि अनुमितौ दृष्टान्तासिद्धिरिति भावः।

ननु प्रत्यक्षाद्यतिरिक्तसाध्यज्ञानत्वप्रकारकेच्छाविरहविशिष्टसिद्धित्वघटितधर्मावच्छिन्नाभावत्वेन निरुक्तपक्षताद्वयमनुगमय्य तज्जन्यत्वमेव अनुमितित्वे प्रयोजकं वाच्यम्। अतो नोक्तदोष इत्यतः प्रयोजकत्वपदार्थं वितर्क्य दूषयति प्रयोजकत्वञ्चेति। वस्तुतोऽर्थापत्तित्वावच्छेदेन तत्सामानाधिकरण्येन वा अनुमितित्वस्य साधने पक्षताजन्यत्वं प्रयोजकम्। आद्ये साध्यादीति तथाच भागासिद्धिरिति। द्वितीये तु आह प्रयोजकञ्चेत्यादीति युक्तमुत्पश्यामः।

प्राञ्चस्तु साध्यादीत्यादिपदेन पक्षाद्युपग्रहः। तेन साध्यपक्षभेदात् पक्षताया नानात्वात् न तज्जन्यता अनुमितित्वप्रयोजिका समव्याप्तस्यैव प्रयोजकत्वस्थितेरित्याशयः। ननु व्याप्यमात्रे प्रयोजकत्वमास्थेयं तत्तत्पक्षसाध्यकानुमितित्वे वा तत्तत्पक्षसाध्यकपक्षताजन्यत्वं प्रयोजकं वाच्यम् इत्यत उक्तं प्रयोजकत्वञ्चेतीत्याहुः। असम्भवादिति अनुमितित्वजातेर्नित्यत्वादिति भावः। इत्यादेरित्यादिपदेन व्यापकत्वमित्यादेः सूचनम्। एतेन उक्तदिशा प्रयोजकत्वस्य निरस्तत्वेन व्याप्तिज्ञानेत्यादिना पक्षधर्मताधीसङ्ग्रहः। अन्वयव्यतिरेकान्यतरव्याप्त्यवगाहिज्ञानजन्यत्वमित्यर्थः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेन न व्याप्त्यननुगमनिबन्धनः स्वरूपासिद्ध्यादिः । अर्थापयामीत्यननुभवस्य व्यतिरेकिपरामर्शप्रयोज्यानुमितित्वावगाहित्वमङ्गीकुर्वतां व्यतिरेकव्याप्तिस्थलेऽपि अनुमितिमेव चणविलम्बेन कल्पयतां सिद्धान्तिकानां मतमाह साध्याभावेत्यादि । साध्यव्याप्यत्वस्य वृत्तिमत्त्वगर्भत्वे गगनादौ व्यभिचारवारणार्थं धर्मपदम् अन्यथा तु उपरञ्जकं तद्बोध्यम् । जलादौ धूमव्यापकाभावप्रतियोगिजलत्वादिपरामर्शात् अप्रसिद्धस्य धूमाद्यभावस्य अर्थापत्तौ उन्नगत्यभावात् प्रसिद्धसाध्यकैव इत्युक्तम् । स एव केचिदित्यत्र अस्वरसः । समवायेनेति वर्त्तमानत्वादित्यन्वयिगुणवदिति । यद्यपि जातिसाध्यक एव संयोगेन घटादिहेतौ अप्रसिद्धिः सम्भवति तथापि सम्बन्धविशेषेण वृत्तिमत्त्वमात्राप्रसिद्धिनिबन्धनानुमानविलयप्रदर्शनाय गुणवदिति साध्यान्तरमित्युक्तम् । पूर्वत्र तु समवेतत्वापेक्षया जातित्वस्य गुरुतया तदवच्छिन्नाभावस्य अप्रसिद्ध्यापि विलयसम्भवादिति द्रष्टव्यम् ।

उपदर्शयेति । तथाच तत्र जात्यादौ जलादिवृत्तित्वानुमानमेव प्रमात्मकव्याप्तिज्ञानादिति भावः । स्वाधिकरणेति । तथाच जात्यादिसामान्याभावस्य हेतुभूतगुणादिमदवृत्तित्वात् नोक्तदोष इति भावः । ननु स्वाधिकरणावृत्तिसाध्याभावकत्वव्याप्तौ स्वाधिकरणवृत्तित्वं न सम्बन्धसामान्येन वक्तव्यम् । जातिमान् द्रव्यत्वात् इत्यादौ अव्याप्तेः द्रव्यत्ववति काले जात्यभावस्य कालिकसम्बन्धेन वृत्तेः । नापि विशेषणतया घटभिन्नं द्रव्यत्वात् इत्यादौ अतिव्याप्तेः । साध्याभावस्य घटत्वादेर्विशेषणतया वृत्तित्वविरहात् अभावीयस्वरूपसम्बन्धेन भावस्य वृत्तौ मानाभावात् । घटत्वाभावो घटे नास्ति इति बुद्धेः क्लृप्तसमवायेनैव सम्भवात् । न चाभावत्वप्रतीतेः प्रमात्वानुरोधेन

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वमते अभावाभावस्य अतिरिक्तत्वात् न दोष इति वाच्यम्। तथापि घटत्वाभावस्य कालिकसम्बन्धावच्छिन्नाभावे साध्ये गगनत्वादिहेतौ अव्याप्तिप्रसङ्गात्। घटत्वाभावरूपस्य साध्याभावस्य विशेषणतया गगनवृत्तित्वात् अतएव न प्रकृत-साध्यवत्ताबोधविरोधिताघटकसम्बन्धेनापि अधिकरणवृत्तित्व-निवेशो युक्तः। कालिकसम्बन्धेन गगनवृत्तित्वाप्रसिद्ध्या कथितस्थल एव अव्याप्तितादवस्थ्यात् सत्वाभाववत्ताबुद्धिविरो-धिताघटकसमवायसम्बन्धेन जातिवृत्तित्वाप्रसिद्ध्या इदं सत्ता-शून्यं जातित्वात् इत्यादौ अव्याप्तेश्च।

किञ्च द्रव्यसामान्याभाववान् जातिसामान्याभाववान् वा घटसत्तान्यतरत्वात् इत्यादौ अतिव्याप्तिः। गगनाद्यात्मकस्य साध्याभावस्य हेत्वधिकरणावृत्तित्वात्। न च साध्याभावत्वाव-च्छेदेन स्वाधिकरणवृत्तित्वाभावो विवक्षितः। स्वाधिकरण-त्वावच्छेदेन साध्यवत्त्वलक्षणव्यापकसाध्यसामानाधिकरण्य-मपेक्ष्यापि गुरुत्वादिति चेन्न। उक्तास्वरसेनैव साध्याभावकत्वा-दौत्यादिपदस्य उपन्यस्तत्वात्। तेन साध्याधिकरणत्वसामान्या-भावस्य साध्यसमानाधिकरणसामान्याभावस्य वा लाभः। तथाच स्वाधिकरणावृत्तिसाध्याधिकरणता सामान्याभावकत्वं स्वाधिकरणावृत्तिसाध्यसमानाधिकरणसामान्याभावकत्वं वा पर्य्यवसितम्। तत्र स्वाधिकरणवृत्तित्वं साध्यसामानाधिकरण्यं तदवच्छिन्नाभावश्च विशेषणताविशेषेणैव वाच्यम्। अतो न कश्चिद् दोषः। साध्याभाववदवृत्त्यधिकरणतावच्छेदकधर्मवत्त्वे तात्पर्य्यम् इत्यपि कश्चिदिति कृतं पल्लवितेन।

ननु एवं स्वत्वप्रवेशे हेतुभेदात् अनन्तकार्य्यकारणभावा-पत्तिः। अत आह स्वत्वेति। प्रागेव स्वव्यापकसाध्यसामा-नाधिकरण्यधियो हेतुत्वस्वीकारदशायामेव स्ववृत्तित्वत्वादि-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वस्य भवद्भिरित्यादिः अस्माभिस्तु हेतुमनन्तर्भाव्य साध्याभाववद्वृत्तित्वज्ञानस्यैव हेतुत्वं स्वीक्रियते इति भावः। एतेन स्वाधिकरणावृत्तीत्यादिक्रमेणैव व्याप्तेर्निर्वचनेन परास्तमित्यग्रेऽन्वयः। नीलरूपवान् नीलसमवेतत्वे सति गोत्वात् इत्यस्यैव सम्यक्त्वे साध्यसाधनकोटौ अभावप्रवेशो विफल इति चिन्तनीयम्।

विशिष्टस्य गोत्वस्य व्यभिचारित्वात् नीलगवादौ विशिष्टहेत्विति परमते। स्वमते तु विशिष्टगोत्वादेः केवलान्वयिनः पथि प्रस्थाप्यत्वमेव इत्याशयेनाह परम्परेति। विशेष्यविशेषणयोः प्रत्येकाधिकरणताद्वयमेव विशिष्टवत्त्वप्रतीतेर्विषयः। अतएव प्रत्येकाधिकरणत्वस्य अभावनिश्चयेऽपि न विशिष्टवत्त्वबुद्धिरिति प्राचां मते विशिष्टनिरूपिताधिकरणत्वाप्रसिद्धौ आह परम्परेत्यादीत्यपि वदन्ति। परम्परा च अत्र स्वाश्रयाधिकरणत्वम् अवच्छेदकत्वाख्यस्वरूपसम्बन्धो वा बोध्यः। तत्रेति यत्र विशिष्टस्य व्याप्यत्वव्यवहारः तत्र विशेषणविशेष्यसम्बन्धस्यैव व्याप्यत्वग्रहादनुमितिरिति।

इति श्रीजगदीशतर्कालङ्कारकृता टीका
समाप्ता।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केवलान्वयिनि अनुमाने जागदीशीटीकाया वादार्थः।

अगृहीतान्वयव्यतिरेकिसाध्यकं केवलव्यतिरेकि इति लक्षणे केवलान्वयिनः संयोगाभावादे र्व्यतिरेकित्वव्युदासाय व्यतिरेकित्वम् अवच्छिन्नवृत्तिकान्यव्यतिरेकप्रतियोगित्वं भेद-प्रतियोगितावच्छेदकत्वं वा इत्युक्तम्। अत्र तादृशप्रतियोगि-तावच्छेदकं भेदप्रतियोगितावच्छेदकं वा यद्रूपं तेन व्यतिरेकित्वं वक्तव्यम्। अन्यथा विशिष्टाभावादिमादाय केवलान्वयिनोऽपि व्यतिरेकित्वापत्तिरिति बोध्यम्। न च पूर्वकल्पे व्यतिरेकि-मात्राभावस्यैव कालिकेन अवच्छिन्नवृत्तिकत्वात् असम्भवा-पत्तिरिति वाच्यम्। व्यतिरेकिताघटकसम्बन्धेन स्वप्रतियोगि-मत्ताबुद्धिविरोधिताघटकसम्बन्धेन अवच्छिन्नवृत्तिकं यत् तद-न्यत्वस्य विवक्षितत्वात्। अथ संयोगादे र्व्यतिरेकित्वानुपपत्तिः संयोगाभावादेर्द्रव्ये अवच्छिन्नवृत्तिकत्वादिति चेदित एव अस्वरसात् द्वितीयकल्प आदृत इति वदन्ति।

परे तु अवच्छिन्नवृत्तिकान्यपदेन निरवच्छिन्नवृत्तिकस्य विवक्षितत्वात् न संयोगादेर्व्यतिरेकित्वानुपपत्तिः। संयोगा-भावादेर्गुणादौ निरवच्छिन्नवृत्तित्वात् अतएव गगनाभावस्य व्यतिरेकित्वापत्तिः। गगनस्य अवच्छिन्नवृत्तिकान्यत्वादिति पूर्वपक्षोऽपि निरस्तः। गगनस्य अवृत्तित्वेन निरवच्छिन्न-वृत्तिकत्वाभावात्। न च संयोगादेः समवेतत्वादिना निर-वच्छिन्नवृत्तित्वात् संयोगाभावादेरपि व्यतिरेकित्वापत्तिरिति वाच्यम्। व्यतिरेकिताघटकसम्बन्धेन स्वप्रतियोगिमत्ताबुद्धि-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरोधिताघटकसम्बन्धावच्छिन्नवृत्तितावच्छेदकानुयोगितानिरूपितप्रतियोगितावच्छेदकं यत् तेन रूपेण व्यतिरेकित्वस्य विवक्षितत्वात्। न च एवं रीत्या पूर्वकल्पपरिष्कारे द्वितीयकल्पानुसरणं कथमिति वाच्यम्। वृत्त्यनियामकसम्बन्धेन व्यतिरेकितास्थले अव्याप्तिमाशङ्क्यैव तत्कल्पादरणादित्याहुः।

अथ द्वितीयकल्पे समवायादिना गगनादे र्व्यतिरेकित्वानुपपत्तिः तेन सम्बन्धेन गगनादिमत्ताप्रसिद्ध्या तेषां भेदप्रतियोगितानवच्छेदकत्वात् इति चेत् अत्र केचित् व्यतिरेकिताघटकसम्बन्धावच्छिन्नभेदप्रतियोगितावच्छेदकत्वशून्यत्वतत्सम्बन्धावच्छिन्नवृत्तित्वोभयाभावस्य विवक्षितत्वात् नानुपपत्तिरित्याहुः। वस्तुतस्तु प्रमाणविभजनप्रकरणे प्रमात्मकानुमितिकरणस्यैव लक्ष्यतया एव लक्ष्यता नास्ति इति यथाश्रुतमेव सम्यक्। न च परत्र गगनसाध्यकस्थले सहचाराप्रसिद्ध्याशङ्कनं विरुध्येत इति वाच्यम्। दशाविशेषे लक्ष्यतावादिनामाचार्य्याणां मत एव तदभिधानात्। मणिकृन्मते उक्तव्याख्याने सन्दर्भविरोधाभावात्। अतएव अनुमितिग्रन्थे उपाध्यायमते प्रमाणनिरूपणप्रस्तावे प्रमैव लक्ष्या इति दीधितिकृत उक्तम्। अतएव भट्टाचार्य्येण एतद्ग्रन्थे गृहीतव्याप्तिभेदात् भेदकल्पे प्रमामात्रस्य लक्ष्यत्वे अखण्डव्यक्तिरेव निवेश्या इत्युक्तमिति नव्याः।

व्यभिचारधीविरोधिज्ञानत्वादिनैव अन्वयसहचारव्यतिरेकसहचारज्ञानयो र्व्याप्तिधीहेतुत्वादिति वा। अथ वह्निः धूमसमानाधिकरण इति ज्ञानसत्त्वेऽपि धूमाभाववद्वृत्तिर्वह्निरिति ज्ञानोदयात् कथं व्यभिचारज्ञानविरोधित्वं सहचारज्ञानस्येति चेत् व्यभिचारज्ञानदशायां सहचारज्ञानाद् व्याप्ति-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानवारणार्थं एकक्षणावच्छिन्नैकात्मवृत्तित्वरूपं व्यभिचारज्ञानस्य यत् सामानाधिकरण्यं तदभावविशिष्टज्ञानत्वेनैव सहचारज्ञानस्य व्याप्तिज्ञानजनकत्वम् आचार्य्यस्याङ्गीकृतम्। अत्र विरोधिपदस्यापि असामानाधिकरण्यार्थकत्वात् नानुपपत्तिरिति।

न च व्यभिचारज्ञानाभावदशायां घटादिज्ञानादपि व्याप्तिज्ञानं स्यादिति वाच्यम्। विशेषणीभूतसहचारज्ञानविरहेण व्याप्तिज्ञानासम्भवात्। न च व्यतिरेकसहचारग्रहमात्रात् कथं व्याप्तिग्रह इति वाच्यम्। तत्र अन्वयसहचारस्य अग्रहेऽपि तद्घटकप्रत्येकपदार्थानां विशकलितज्ञानाद् विशेषे विशेषणमितिरीत्या व्याप्तिग्रहसम्भवात्। प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वव्यापकान्वयसहचारत्वकत्वलक्षणे यथाश्रुतार्थे धूमादिनिष्ठवह्न्यादिव्याप्तेरपि कदाचित् व्यतिरेकसहचारग्रहेण ग्रहात् असम्भवोऽभिहितः। अथ वाच्यत्वादिसाध्यके व्यतिरेकसहचाराप्रसिद्ध्या कथमसम्भव इति। न च समूहालम्बनज्ञानविषयघटादिसहचारमादायैव असम्भवः सम्पादनीय इति वाच्यम्। यथाश्रुतार्थं परित्यज्य ज्ञानांशे स्वत्वनिवेशकल्पेऽपि तद्दोषस्य परं स्वयमाशङ्कितत्वेन तदादाय एतद्दोषसङ्गमनस्य कदाचित् व्यतिरेकसहचारग्रहेण ग्रहात् इति हेत्वभिधानस्य असङ्गत्यापत्तेरिति चेन्न। धूमादिनिष्ठवह्न्यादिव्याप्तेरिति विशेषोत्कीर्त्तनेन असम्भवपदस्य अव्याप्तिपरत्वात्। वस्तुतस्तु यत्र घटपटसहचारे ज्ञेयत्वाभावो वाच्यत्वाभावसमानाधिकरण इति भ्रमविषयत्वम्। घटादिसहचारविषयकतादृशभ्रमान्तरं ज्ञेयत्वे वाच्यत्वव्याप्तिज्ञानञ्च तत्र घटादिसहचारस्यापि प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वात् अन्वयसहचारत्वाभावाच्च व्यापकत्वभङ्गेन केवलान्वयिसाध्यादिस्थलेऽपि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्षणासम्भवतोऽसम्भवः सम्भवत्येव इति विभाव्यम्।

प्रकृतहेतुधर्मिकप्रकृतसाध्यव्याप्यवगाहीत्यादि अत्र व्यापकदिशि हेतुधर्मिकसाध्यसहचारविषयित्वम् इत्यस्य घटकीभूतहेतुपदम् हेतुतावच्छेदकावच्छिन्नार्थकम् अन्यथा संयोगाभाववान् संयोगात् इत्यादौ संयोगाभावाभावः संयोगाभावसमानाधिकरण इति व्यतिरेकसहचारग्रहाधीनव्याप्तिज्ञाने व्यतिरेकिण्यतिव्याप्तेः। हेतुतावच्छेदकप्रवेशे तु संयोगाभावाभावत्वेन धर्मिविषयासंयोगस्य भाने संयोगत्वेन अभानात् नातिप्रसङ्गः। न च प्रकृतपददानेऽपि संयोगाभावाभावसंयोगः संयोगाभावसमानाधिकरण इत्यस्य सङ्ग्रहो दुर्वारः। प्रकृतहेतुधर्मिकसाध्यसहचारावगाहितायास्तत्र सत्त्वादिति वाच्यम्। यज्ज्ञानेत्यादिना यज्ज्ञाननिष्ठविषयतायाः प्रयोजकतावच्छेदकरूपव्यापकत्वस्य साध्यान्वयसहचारावगाहितात्वे विवक्षणीयत्वात्। न च एवमपि असम्भवः साध्यसमानाधिकरणो हेतुः साध्यवदधिकरणम् अधिकरणवृत्तिर्हेतुरिति ज्ञानद्वयनिष्ठकारणत्वस्य लाघवेन तादृशनिरूप्यनिरूपकभावापन्नविषयत्वेन वाच्यतया यज्ज्ञाननिष्ठविषयताप्रयोजकतावच्छेदकरूपस्य साध्यवदधिकरणम् अधिकरणवृत्तिर्हेतुरिति ज्ञानीयावगाहितायां सत्त्वेन न तत्र अन्वयसहचारावगाहितात्वस्य असत्त्वेन तादृशरूपव्यापकत्वभङ्गादिति वाच्यम्। अन्वयसहचारज्ञानीयावगाहितावृत्तित्वविशिष्टतादृशरूपव्यापकत्वस्य विवक्षितत्वादिति ध्येयम्। इदन्तु चिन्त्यते व्यतिरेकसहचारावगाहितापदेन यदि साध्याभावधर्मिकहेत्वभावसामानाधिकरण्यावगाहित्वं परित्यज्य हेत्वभावसामानाधिकरण्यावगाहितानिरूपितसाध्याभावविशेष्यत्वं विवक्ष्यते तदा अन्वयसहचारावगाहितायां तादात्म्यसम्बन्धेन तादृशसाध्याभा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वविशेष्यतात्मकव्यतिरेकसहचारावगाहिताव्यापकत्वासम्भवात् प्रकृतपदं व्यर्थमेव।

तत्र साध्यपदमपि साध्यतावच्छेदकावच्छिन्नपरम्। अन्यथा संयोगवान् संयोगाभावात् संयोगाभाववान् संयोगाभावाभावात् इत्यादौ यथायथं संयोगाभावः संयोगाभावाभावसमानाधिकरण इति संयोगाभावाभावः संयोगाभावाभावसमानाधिकरण इति व्यतिरेकसहचारग्रहाधीनव्याप्तिग्रहेऽतिव्याप्तिः। एवञ्च प्रकृतहेतुधर्मिकप्रकृतसाध्यव्याप्यवगाहीत्यत्र हेत्वंशे प्रकृतत्वानुक्तौ वह्निसमानाधिकरणधूमवद्वृत्तिद्रव्याभावसमानाधिकरणो वह्न्यभाव इति सहचारज्ञानजन्ये वह्निव्याप्यवह्निसमानाधिकरणधूमवद्वृत्तिद्रव्यमिति ज्ञाने वह्निसाध्यकधूमहेतुककेवलान्वयित्वापत्तिः। अतः प्रकृतेति हेतुतावच्छेदकावच्छिन्नार्थकम्। वह्निसमानाधिकरणधूमवद्वृत्तिद्रव्याभावो धूमाभावसमानाधिकरण इति ज्ञानाधीने वह्निसमानाधिकरणधूमवद्वृत्तिद्रव्यव्याप्यो धूम इति ज्ञाने तद्विशेष्यधूमे वा वह्निसाध्यकधूमहेतुककेवलान्वयित्वापत्तिः। अतः प्रकृतत्वं साध्यविशेषणम्। अथ प्रकृतहेतुधर्मिकसाध्यव्याप्यवगाहियज्ज्ञानजनकज्ञाने अवृत्तिसाध्यहेतुव्यतिरेकसहचारावगाहित्वमिति कृते नैव सामञ्जस्ये उक्तगुरुतरप्रयासानौचित्यमिति चेत्। अत्र केचित् प्रकृतव्याप्यवगाहि यज्ज्ञानजनकज्ञानविषयसहचारत्वव्यापकसाध्यान्वयसहचारत्वकत्वमिति दीधित्युक्तलक्षणस्य परिष्कारो जगदीशेन अवगाहितामन्तर्भाव्य कृतः। उक्तरूपस्य च अन्यविधत्वेन तद्व्याख्यानासम्भवेन तस्य लघुत्वेऽपि तदर्थो न कृतः। न च दीधितिकृतैव कथं नोक्तरीतिरादृता एकलक्षणस्य लक्षणान्तरादूषकत्वादित्याहुः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परे तु वह्न्यभावो धूमाभावसमानाधिकरणो धूमो वह्निसमानाधिकरणश्च इति ज्ञाने घटकालीनवह्न्यभावो धूमाभावसमानाधिकरण इति ज्ञानीयव्यतिरेकसहचारावगाहित्वस्य अवर्त्तमानतया अन्वयव्यतिरेकिण्यतिव्याप्तिः। न च तथापि तादृशव्याप्त्यवगाहियज्ज्ञानजनकीभूतज्ञाने व्यतिरेकसहचारावगाहित्वाभाव इति वक्तव्यमिति वाच्यम्। तथा सति यत्र एकम् अन्वयसहचारज्ञानम् अपरञ्च व्यतिरेकसहचारज्ञानम् अनन्तरञ्च व्याप्तिज्ञानम् तादृशान्वयव्यतिरेकिस्थले अतिव्याप्तिः। तज्ज्ञानजनकीभूतान्वयसहचारज्ञाने व्यतिरेकसहचारावगाहित्वाभावादिति। न च तादृशव्यतिरेकसहचारावगाहितात्वं तादृशज्ञानवृत्तितानवच्छेदकम् इति विवक्षया तद्वारणं सम्भवतीति वाच्यम्। विशेषवृत्तिपदार्थस्य वैशिष्ट्यावच्छेदेन अभावाननुगमेन अवगाहितात्वे तद्वृत्तितावच्छेदकत्वसत्त्वे व्यतिरेकसहचारावगाहितात्वे तदभावासत्त्वेन असम्भवापत्तेः। न च तादृशावगाहितासामान्ये तादृशज्ञानावृत्तित्वविवक्षणात् न यथोक्तदोष इति वाच्यम्। सामान्यपदस्य व्यापकतार्थकतया लाघवानवकाशात्। न च तादृशगुरुतरस्य अनिवेशादेव लाघवमिति वाच्यम्। अवच्छेदकत्वग्रन्थे केचित्तु इति मते लिखितस्य अन्यतरत्वस्य अखण्डस्य प्रामाणिकत्वे प्रत्युत एव लाघवात्। अन्यतरत्वस्य भेदरूपत्वेऽपि प्रतियोगिविनाकृतस्य अखण्डभेदस्य निवेशेऽपि गौरवाभावाच्च इत्याहुः।

यत्र केवलान्वयिनि साध्याभावधर्मिकहेत्वभावसहचारग्रहोऽप्रसिद्धः तत्र अव्याप्तेरेव पूर्वकल्पत्यागबीजत्वमुक्तम्। न च परकल्पेऽपि जनकज्ञाननिष्ठान्वयसहचारावगाहित्वव्यतिरेकसहचारावगाहित्वयोरन्यतरस्योक्तस्थले अप्रसिद्ध्या उक्ताव्या-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रे रपरीहारादिति वच्यम् केवलान्वयि विशेषे अनाहार्य्यस्य व्यतिरेकसहचारग्रहस्य अप्रसिद्धावपि आहार्य्यव्यतिरेकसहचारज्ञानस्य प्रसिद्धत्वात् तत्र व्यतिरेकसहचारावगाहितायाः प्रसिद्धया अन्यतरप्रसिद्धेः। न च अवगाहितायाम् इच्छाऽप्रयोज्यत्वमवश्यं निवेश्यम् अन्यथा व्यतिरेकसहचारांशे आहार्य्यात्मकं यत् समूहालम्बनज्ञानं तदधीनव्याप्तिज्ञानस्य तद्विषयहेतो वा केवलान्वयितया तत्राव्याप्तिप्रसङ्गात्। एवञ्च कथमाहार्य्यावगाहितायाः ग्रहणमिति वाच्यम्। अन्यतरांशे अनाहार्य्यत्वनिवेशेऽपि अन्यतरत्वप्रतियोगिकोटिप्रविष्टावगाहितायां प्रयोजनविरहेण अनाहार्य्यीयत्वानिवेशात्।

पूर्वकल्पे स्वाश्रयानाहार्य्यज्ञानजन्यत्वसम्बन्धेन व्यतिरेकसहचारित्वाभावोऽपि निवेशयितुमशक्यः। वृत्त्यनियामकतादृशसम्बन्धस्य प्रतियोगितानवच्छेदकत्वात्। न च तादृशसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वसम्बन्धेन व्यतिरेकसहचारावगाहितावत्त्वस्य विवक्षणीयतया न तद्दोष इति वाच्यम्। तत्र तादृशसम्बन्धेन तादृशावगाहितावत्त्वाप्रसिद्धया तादृशभेदस्य अप्रसिद्धे नोक्तप्रकारः साधुरिति चिन्त्यम्। प्रकृतानुमितिहेतुज्ञानविषयव्याप्तित्वव्यापकप्रकृतसाध्यान्वयव्याप्तित्वकत्वमिति लक्षणस्य प्रकृतहेतुमत्तानिश्चयोत्तरप्रकृतसाध्यकानुमितित्वघटितत्यादिना तात्पर्य्यार्थो जगदीशेन कृतः।

नचात्र निश्चयदलं व्यर्थं हेतुप्रकारकज्ञानाव्यवहितोत्तरत्वादिकमेव उच्यतामिति वाच्यम्। तथा सति वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवान् पर्वतः अभावव्यापकवह्निसमानाधिकरणाभाववांश्च पर्वत इत्याकारकसमूहालम्बनो यः परामर्शः धूमत्वेन धूमहेतुककेवलव्यतिरेकी अभावत्वेन अभावहेतुककेवलान्वयी च तत्राव्याप्तेः। निश्चयत्वनिवेशे च तदुत्तरानु-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मितिनिष्ठजन्यताया व्यतिरेकव्याप्त्यंशे अभावरूपप्रकृतहेतु प्रकारकनिश्चयघटितरूपानवच्छिन्नत्वात् नाव्याप्तिः विशेषणांशे संशयाकारभानानभ्युपगमादित्याशयः। अत्र घटितपदं पर्य्याप्त्यनिवेशसूचनाय। पर्य्याप्तिनिवेशे व्याप्तिविषयित्वाद्यवच्छित-तादृशरूपे कार्य्यतावच्छेदकताया अपर्य्याप्तत्वेन असम्भवापत्तेः। अथ परामर्शनिष्ठायास्तादृशकारणताया अवच्छेदकप्रकारिता-त्वस्य धूमादिनानापदार्थप्रकारितायां सत्त्वे न तत्र व्याप्तिप्रका-रितात्वस्य असत्त्वेन च असम्भवापत्तिरिति चेन्न। प्रकृतपक्ष-विषयित्वावच्छिन्नप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविषयित्वा-वच्छिन्नप्रकारितात्वस्य विवक्षितत्वादिति वदन्ति। तन्न। जलं निर्गन्धमित्यादिग्रन्थविरोधापत्तेः। हेतुतावच्छेदकप्रकारिताया हेतुतावच्छेदकावच्छिन्नहेतुविषयित्वावच्छिन्नत्वाभावात्।

वस्तुतस्तु परामर्शनिष्ठजनकता लक्षणे न निविष्टा किन्तु हेतुधर्मिकव्याप्तिज्ञानरूपकरणनिष्ठकरणतारूपजनकतैव प्रवि-ष्टा तथाच नोक्तापत्तिः। न च करणतारूपकारणताया ज्ञान-त्वादिनैव अवच्छेदात् कथं व्याप्तिप्रकारितायास्तदवच्छेद-कत्वमिति वाच्यम्। प्राचां मते हेतुधर्मिकव्याप्तिज्ञानत्वेनैव करणत्वाभ्युपगमात्। न च तादृशज्ञानत्वेन करणत्वमते तादृशज्ञानाव्यवहितोत्तरत्वघटितरूपस्यैव कार्य्यतावच्छेदक-त्वेन प्रकृतहेतुमत्तेत्यादिरूपस्य अतथात्वेन तथा निवेशे असम्भव एव भवतीति वाच्यम्। करणव्यापारयोरेकधर्मावच्छिन्नं प्रत्येव जनकत्वमिति प्राचां मतेनैव तदभिधानात्। न च तथापि हेतुतावच्छेदकप्रकारिताया अपि तादृशजनकताव-च्छेदकत्वेन असम्भवस्तदवस्थ इति वाच्यम्। प्रकारितात्वेन तादृशजनकतावच्छेदकताया विवक्षितत्वात्। न च जलं निर्गन्धम् इत्यादिग्रन्थविरोध इति वाच्यम्। तत्र पृथिवीत्वा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्यभावानुमितौ पृथिवीत्वव्यापकाभावप्रतियोगित्वहेतुतावच्छेदकविशिष्टवत्तावच्छेदेनैव हेतुतया तादृशहेतुतावच्छेदकस्य व्याप्यन्तरधर्मितानवच्छेदकत्वेन तत्प्रकारतायाः प्रकारितात्वेनैव अवच्छेदकत्वेन तद्ग्रन्थविरोधाभावात्।

अत्र केचित् तादृशजनकतावच्छेदकीभूतप्रकारितात्वव्यापकं प्रकृतसाध्यव्यतिरेकव्याप्तिप्रकारितान्यत्वं तदनुमितिकरणत्वं केवलान्वय्यनुमानत्वम्। साध्यान्वयव्याप्तिप्रकारितात्वपदेन साध्यव्यतिरेकव्याप्तिप्रकारितान्यत्वस्य विवक्षितत्वात्। तादृशप्रकारितान्यत्वस्य च हेतुप्रकारितादौ सत्त्वेन अव्याप्त्यसम्भवात्। व्यतिरेकव्याप्तिप्रकारितायाञ्च असत्त्वेन अतिव्याप्त्यसम्भवात्। न च एवमुदचरत्वमिति वाचम्। तादृशसहचारत्वव्यापकप्रकृतव्याप्तिघटकसहचारत्वकत्वमिति लक्षणस्य पूर्वस्थितस्य जगदीशेन तत्रापि प्रकृतहेतुसाध्यकान्वयव्याप्त्यवगाहियज्ज्ञानजनकीभूतज्ञानवृत्तिविषयितात्वव्यापकं व्यतिरेकसहचारावगाहितान्यत्वं तज्ज्ञानविषयताविशिष्टप्रकृतहेतुत्वं केवलान्वयित्वम् इत्यर्थकृतत्वेन ग्रन्थकृतैव एकपदस्य अन्यार्थकत्वं स्वीकृतमिति वदन्ति।

नव्यास्तु प्रकृतसाध्यान्वयव्याप्तिविशिष्टपक्षविशिष्टबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकप्रकारतायाः प्रकृतसाध्यान्वयव्याप्तिप्रकारत्वावच्छिन्नजनकतावच्छेदकप्रकारतायाश्च प्रकृतसाध्यान्वयव्याप्तिप्रकारतापदेन विवक्षितत्वात् न दोषः। अथवा मुख्यविशेष्यतानिरूपितप्रकारतानिरूपितधर्मितावच्छेदकतानात्मकतादृशजनकतावच्छेदकप्रकारतात्वव्यापकप्रकृतसाध्यान्वयव्याप्तिप्रकारतात्वस्य निवेशात् नानुपपत्तिलेशोऽपि। एतेन तादृशजनकतापदेन परामर्शनिष्ठजनकताया ग्रहणेनापि न क्षतिरिति विभावनीयम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ वह्नौ साध्ये तद्धूमत्वेन धूमहेतुकव्यतिरेकिण एव धूमत्वेन धूमहेतुककेवलान्वयित्वात् तत्राव्याप्तेर्वारणाय हेतौ प्रकृतपदं प्रकृतहेतुतावच्छेदकावच्छिन्नार्थकमित्युक्तं जगदीशेन। अत्र हेतुतावच्छेदकतायाः पर्य्याप्त्यधिकरणत्वम् अवश्यं निवेश्यम् अन्यथा महानसीयधूमत्वेन धूमहेतुककेवलान्वयिनि धूमत्वेन धूमहेतुकव्यतिरेकिणि अव्याप्त्यापत्तेः। अथ अत्र हेतुतावच्छेदके प्रकारतावच्छेदकतायाः पर्य्याप्त्यधिकरणत्वं निवेश्यते न वा हेतुतावच्छेदकपर्य्याप्त्यवच्छेदकताकप्रकारताकनिश्चयोत्तरानुमितित्वघटितधर्मावच्छिन्नजन्यतैव निवेश्यते तदा अव्यवहितोत्तरत्वसम्बन्धेन वह्निव्याप्यधूमवत्पर्वतविषयकनिश्चयविशिष्टानुमितित्वावच्छिन्नं प्रति तादृशपरामर्शत्वेन हेतुत्वात् तादृशानुमितित्वावच्छिन्नजन्यतावच्छेदकीभूतप्रकारतावच्छेदकताया धूमत्वे इव व्याप्तौ अपि सत्त्वेन धूमत्वपर्य्याप्तावच्छेदकताकप्रकारताकनिश्चयोत्तरानुमितित्वघटितधर्मावच्छिन्नजन्यताया अप्रसिद्धत्वात् धूमत्वेन धूमहेतुकानुमितौ वह्निव्याप्यकालीनधूमवान् पर्वत इति ज्ञानस्यापि कारणतया तादृशज्ञानोत्तरानुमितित्वावच्छिन्नं प्रति तादृशपरामर्शत्वेन हेतुतया धूमत्वपर्य्याप्तावच्छेदकताकप्रकारताकनिश्चयोत्तरानुमितित्वावच्छिन्नजन्यताया अप्रसिद्धत्वाच्च तादृशजन्यताघटितलक्षणस्यापि अप्रसिद्धेः।

न चात्र हेतुतावच्छेदकतायाः पर्य्याप्त्यधिकरणे प्रकारतावच्छेदकतायाः पर्य्याप्ति निवेश्यते एव ग्रन्थकृदुक्ते तद्धूमत्वेन धूमहेतुकव्यतिरेकिणि धूमत्वेन धूमहेतुककेवलान्वयिनि तद्व्याप्तित्वरूपतद्धूमत्वस्य हेतुतावच्छेदकत्वाभावात् न अव्याप्तिसम्भावना इति वाच्यम्। तथा सति यत्र स्थले तत्तद्विशिष्ट-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धूमत्वेन धूमहेतुककेवलव्यतिरेकिणः धूमत्वेन धूमहेतुककेवलान्वयित्वं तत्र तत्ताविशिष्टधूमत्वस्य हेतुतावच्छेदकतापर्य्याप्त्यधिकरणधूमत्वानतिरेकात् तत्र अव्याप्तेरनुद्धारात् इति चेन्न। अत्र हेतुतावच्छेदके प्रकारितावच्छेदकतायाः पर्य्याप्त्यधिकरणत्वं न निवेश्यते। किन्तु हेतुतावच्छेदकपर्य्याप्तावच्छेदकतानिरूपिता या हेतुतावच्छेदकप्रकारित्वनिष्ठावच्छेदकता तन्निरूपितहेतुप्रकारितानिष्ठावच्छेदकतानिरूपितपक्षविशेष्यतानिष्ठावच्छेदकतानिरूपकजन्यताया एव लक्षणघटकत्वात् नाप्रसिद्धिः।

धूमत्वेन धूमहेतुकानुमितौ वह्निव्याप्यमहानसीयधूमवान् पर्वत इति परामर्शस्य जनकत्वेऽपि नीलत्वे नीलविषयितायां वा तादृशजन्यतायाः परस्परानिरूपितावच्छेदकत्वस्य असत्त्वेन धूमत्वे प्रकारतावच्छेदकत्वपर्य्याप्तिसत्त्वेऽपि धूमपर्य्याप्तावच्छेदकतायाः परस्परानिरूपितजन्यतायाः सत्त्वात् न कोऽपि दोषः। न च अत्र तत्ताविशिष्टधूमत्वेन धूमहेतुककेवलव्यतिरेकिणि धूमत्वेन धूमहेतुककेवलान्वयिनि स्थले धूमत्वधर्मितावच्छेदकतत्तामवगाह्य तत्ताधूमत्वोभयधर्मितावच्छेदकव्याप्तिमवगाह्य ज्ञानस्य तादृशजन्यतायाः परस्परानिरूपितावच्छेदकतया तत्र अव्याप्ति दुर्वारैवेति वाच्यम्। पर्वतविशेष्यकत्वनिष्ठावच्छेदकतानिरूपितधूमविषयित्वनिष्ठावच्छेदकतानिरूपितधूमत्वविषयित्वनिष्ठावच्छेदकता तन्निरूपितावच्छेदकताया धूमत्वपर्य्याप्तत्वाभावात् तादृशावच्छेदकताया निरुक्तजन्यताघटकत्वात् अव्याप्तेरसम्भव इत्यास्तां विस्तरः।

नव्यास्तु प्रकृतहेतुतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकावच्छिन्नपर्य्याप्तिकविशेष्यतावच्छेदकताभिन्नविशेष्यतावच्छे-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दकत्वानिरूपकत्वस्य हेतुतावच्छेदकनिष्ठप्रकारताभिन्नत्वे सति अन्वयव्याप्तिप्रकारताभिन्नत्वे सति व्यतिरेकव्याप्तिप्रकारताभिन्ना या प्रकारता तदनिरूपितत्वस्य विवक्षितत्वात् अदोष इति वदन्ति।

अथ तथापि व्याप्तिविशिष्टहेतुमत्तानिश्चयोत्तरानुमितित्वघटितधर्मावच्छिन्नं प्रति व्याप्तिविशिष्टहेतुमत्तानिश्चयत्वेन हेतुत्वं न तु शुद्धहेतुप्रकारकनिश्चयोत्तरानुमितित्वावच्छिन्नं प्रति तादृशनिश्चयत्वेन। एवञ्च व्याप्तिविशिष्टहेतुप्रकारकनिश्चयत्वाघटकस्य हेतुप्रकारत्वान्यत्वस्य हेतुप्रकारत्वान्यप्रकारतानिरूपितत्वाभावस्य च अनुमितित्वावच्छिन्नजन्यतायाः परस्परावच्छेदकत्वाभावात् तत्र तत्र अवच्छेदकत्वघटितजन्यताया अप्रसिद्धत्वात् तत्र तत्र अवच्छेदकत्वघटितस्य निरुक्तलक्षणस्य असम्भवापत्तिरिति चेत् अत्र समाधानम्।

अत्रापि उक्तरीत्या हेतुतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकतानिरूपिता या अन्यनिष्ठावच्छेदकता तन्निरूपितप्रकारतानिष्ठावच्छेदकतानिरूपितनिरूपितत्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपितपर्वतविशेष्यतानिष्ठावच्छेदकतानिरूपितजन्यतैव लक्षणे निवेशनीया। केवलान्वयिस्थले अन्वयव्याप्तिविशिष्टहेतुप्रकारतानिष्ठावच्छेदकतान्यत्वनिष्ठावच्छेदकतां प्रगृह्यैव लक्षणसमन्वयः। अन्वयव्यतिरेकिस्थले व्यतिरेकव्याप्तिविशिष्टहेतुप्रकारतानिष्ठावच्छेदकतां प्रगृह्यैव अतिव्याप्तिवारणमिति न कुत्रापि दोषः।

केचित्तु व्याप्तिविशिष्टहेतुप्रकारकनिश्चयोत्तरानुमितित्वावच्छिन्नजन्यतैव लक्षणघटिका इति न पूर्वपक्षावकाश इति वदन्ति। तन्न। अन्वयव्यतिरेकिस्थले अतिव्याप्त्यापत्तेः। व्याप्तिपदेन अन्वयव्याप्तिरेव वाच्या। अन्यथा केवलान्वयिनि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अव्याप्तेः अन्वयव्यतिरेकव्याप्तिनिष्ठानुगतव्याप्तित्वाभावात् उभयसाधारणं न सम्भवति। अन्वयव्यतिरेकस्थले च अन्वयव्याप्तिविशिष्टहेतुप्रकारकनिश्चयोत्तरानुमितित्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकप्रकारतात्वस्य व्यतिरेकव्याप्तिप्रकारतायामसत्त्वात् अतिव्याप्ते दुर्वारकत्वात्।

लिङ्गतावच्छेदकविशिष्टस्य लिङ्गस्य यज्ज्ञाने इतरव्यापकाभावप्रकारकत्वानवच्छिन्नं तादृशानुमितिजनकत्वं यज्ज्ञानीयेतरव्यापकाभावप्रतियोगित्वप्रकारत्वानवच्छिन्नलिङ्गतावच्छेदकावच्छिन्नविशेष्यता तादृशानुमितिजनकतावच्छेदिका तज्ज्ञानमेव केवलान्वयि। तेन जलं निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वात् इत्यादौ इतरव्यापकाभावप्रतियोगित्वप्रकारतात्वेन इतरव्यापकाभावप्रतियोगित्वप्रकारत्वानिरूपितमेव तादृशलिङ्गतावच्छेदकावच्छिन्नविशेष्यत्वम्। अतो गन्धाभावव्याप्यपृथिवीत्वव्यापकाभावप्रतियोगिमज्जलमिति ज्ञानस्य लिङ्गतावच्छेदकविशिष्टस्य लिङ्गस्य यज्ज्ञाननिष्ठेतरव्यापकाभावप्रतियोगित्वप्रकारत्वानवच्छिन्नतादृशानुमितिजनकत्वस्य असत्त्वेन केवलान्वयित्वहानिरित्यनेनैव जगदीशेन निष्कर्षः कृतः।

ननु साध्यव्याप्यहेतुमान् साध्याभावव्यापकाभावप्रतियोगिमांश्च पक्ष इत्याकारकज्ञानीयेतरव्यापकाभावप्रतियोगित्वप्रकारत्वानिरूपितं यत् अन्वयव्याप्तिविशिष्टलिङ्गतावच्छेदकावच्छिन्नविशेष्यत्वं तस्य तादृशानुमितिजनकतावच्छेदकत्वेन अन्वयव्यतिरेकेणि अतिव्याप्तिरिति चेन्न। यज्ज्ञानीयलिङ्गतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्नप्रकृतसाध्यकानुमितित्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतासामा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यम् इतरव्यापकाभावप्रतियोगित्वप्रकारत्वानवच्छिन्नं तज्ज्ञानमेव केवलान्वयि इत्यस्य विवक्षितत्वात्।

तथाच तादृशस्थलीयतादृशानुमितिजनकतासामान्यान्तर्गतं यत् व्यतिरेकव्याप्तिज्ञानीयजनकत्वं तस्य इतरव्यापकाभावप्रतियोगित्वप्रकारत्वावच्छिन्नत्वात् नातिव्याप्तिरिति। न च तथापि वह्न्यभावव्यापकीभूताभावप्रतियोगिमान् वह्निव्याप्यधूमवान् पर्वत इति असमूहालम्बनज्ञानमादाय अन्वयव्यतिरेकिणि अतिव्याप्तिः। तत्र प्रत्येकज्ञानीयजनकतासामान्यान्तर्गतम् अन्वयव्याप्तिज्ञानीयतादृशानुमितिजनकत्वम् तस्य इतरव्यापकाभावप्रतियोगित्वप्रकारत्वानवच्छिन्नत्वादिति वाच्यम्। यज्ज्ञानाव्यवहितोत्तरप्रकृतसाध्यकानुमितित्वघटितधर्मावच्छिन्नजन्यतानिरूपितलिङ्गतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्नजनकतासामान्यम् इतरव्यापकाभावप्रतियोगित्वप्रकारत्वानवच्छिन्नं तज्ज्ञानमेव केवलान्वयि इत्यनेन विवक्षितत्वात्।

तथाच यज्ज्ञानपदेन तादृशोभयज्ञानस्य धर्त्तव्यत्वेन तदुत्तरानुमितिनिष्ठकार्य्यतानिरूपितकारणतासामान्यान्तर्गता या व्यतिरेकव्याप्तिज्ञानीयजनकता तस्या इतरव्यापकाभावप्रतियोगित्वप्रकारत्वावच्छिन्नत्वात् न तत्रातिव्याप्तिरिति। यज्ज्ञानपदेन तादृशानुमितिजनकतावच्छेदकतापर्य्याप्त्यधिकरणीभूतविषयताशालियज्ज्ञानाव्यवहितोत्तरत्वस्य विवक्षितत्वात् नोदासीनज्ञानादौ अतिव्याप्तिरिति ध्येयम्।

गुरुचरणास्तु यज्ज्ञाननिष्ठतादृशानुमितिजनकत्वं लिङ्गतावच्छेदकावच्छिन्नविषयतानिरूपिता या इतरव्यापकाभावप्रतियोगित्वप्रकारता तदवच्छिन्नजनकतानिरूपितजन्यताशून्यानुमितिनिष्ठजन्यतानिरूपितं तज्ज्ञानमेव केवलान्वयि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न च लिङ्गतावच्छेदकावच्छिन्नविषयतानिरूपितत्वस्य इतरव्यापकाभावप्रतियोगित्वप्रकारतायां विशेषणं व्यर्थमिति वाच्यम्। जलं निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वात् इत्यादौ गन्धाभावान्वयव्याप्तिज्ञानस्य केवलान्वयितया तत्र अव्याप्त्यापत्तेः। तादृशव्याप्तिज्ञाननिष्ठजनकतायां गन्धाभावव्याप्यपृथिवीत्वव्यापकाभावप्रतियोगिमत् जलम् इति ज्ञानजन्यसमूहालम्बनानुमितौ इतरव्यापकाभावप्रतियोगित्वप्रकारत्वावच्छिन्नजनकतानिरूपितजन्यताशून्यत्वविरहेण तादृशप्रकारत्वावच्छिन्नजनकतानिरूपितजन्यताशून्यानुमितिनिष्ठजन्यतानिरूपितत्वाभावात्। अनयैव दिशा परलक्षणमपि परिष्कार्य्यम्।

इति पण्डितकुलपतिना वि, ए, उपाधिधारिणा श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण सङ्कलितः केवलान्वय्यनुमानस्य जागदीशीटीकावादार्थः समाप्तः।

44032

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



R661,UPA-K
44035

पण्डितकुलपतिः

जीवानन्दविद्यासागर वि, ए,

PANDITA KULAPATI

JIBANANDA VIDYASAGARA, B. A.

Superintendent, Free Sanskrit College, Calcutta.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Entered in Database
Signature with Date

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार

वर्ग संख्या ६६१/३८ आगत संख्या ४४०३५

पुस्तक विवरण की तिथि नीचे अंकित है। इस तिथि सहित ३० वें दिन यह पुस्तक पुस्तकालय में वापस आ जानी चाहिए अन्यथा ५० पैसे प्रतिदिन के हिसाब से विलम्ब दण्ड लगेगा ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार

विषय संख्या 661/32 आगत नं० 84035

लेखक ....

शीर्षक केवलान्वयि अनुमानम्

दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या

गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार
कृपया पुस्तक के ऊपर कोई निशान
आदि न लगाये।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar